नादिरपि ३

यथाक्रमं ते [illegible] २ तामसादहंकारादाकाशादि ४२

स्पर्शादय इंद्रियाणां विषयाः महाभूतानां गुणाः भवंति २ उक्तानां भूतसूक्ष्माणामधिष्ठातृदेवा
नाह २

अंतःकरणानि धीन्द्रियाणि चेति द्वंद्वः १ अंतःकरणानि विभजते २

अनुमानगतस्वे॰५ पंचविंशतितत्त्ववादिनः ५
गौतमीय॰५ केचननैयायिकागौतमीयाउपमानंचकुरितिपापेक्षयाचतुर्थं प
अनेकधेत्युक्तंप्रपंचयति॰३
ऽ बहुसाधर्म्येणापेचधर्मेणावाऽन्यस्यावेक्षा ४ इत्यमा
नोपिचतुरमिति अर्थमात्ररूपावृत्तिः ४
आकाशादिविशेषः ३
ज्ञानशास्त्रे विविधतस्वाः नागकुंतलमाह॰ २
चेतनापेक्षमपिकार्यंजायते दुग्धंयथावत्साकारेणपरिणाम
तेइत्याशंक्याह॰ २ वस्तुस्वाभितिसामान्याकारेणोक्तेरिति २
एषोतिमेतदात्मपदं। तमआसीदितिश्रु॰ पोदशतुप्रधानमतो ः कारणत्वमुक्तमितियो
क्तमाह॰ २ प्रत्यक्ष ४ सांख्ये

मा॰ उ॰ त्रा णः क्रियाक्रियावान्नित्याद्याःप्रकाशस्यैवकस्मनाः ११ चैतन्यंपरमात्मानंप्रधानस्यापिनेष्यते॥ज्ञानक्रियेजगत्क
र्मोद्गच्छेतेचेतनाश्रये १२ कालरूपक्रियाध्यक्षासाक्षीएतस्मिरिणमेद्धि ज्ञातंज्ञानज्ञेयरूपंज्ञानशास्त्राभवेज्ज्ञागत् १४
ज्ञानंद्विधावस्तुमात्रद्योतकंनिर्विकल्पकं सविकल्पंतुसंज्ञादिद्योतकत्वादनेकधा १५ संकल्पसंशयभ्रांतिस्मृतिसा
दृश्यनिश्चयाः॥ तुहीनष्ठमवसायश्चतथामेनुभवाश्रपि १६ प्रत्यक्षमेकंचार्वाकाःकणादसुगतौपुनः अनुमानं
चतच्चापिसांख्याःशब्दंचतेअपि १७ न्यायैकदेशिनोप्येवमुपमानंचकेचन अर्थापत्त्यासहैतानिचत्वार्याहप्रभा
करः १८ अभावषष्ठान्येतानिभाट्टावेदांतिनस्तथा संभवैतिह्ययुक्तानितानिपौराणिकाजगुः १९ द्रव्यंगुणस्तथा
कर्मसामान्यंसविशेषकम् समवायश्चकाणादाःपदार्थान्षड्ब्रुवते २० नवद्रव्याणिभूतानिदिक्कालात्ममनांसि
सिच चतुर्विंशतिरेवस्युर्गुणाःशब्दादिपंचकं २१ परिमाणंचसंख्याचद्वौसंयोगविभागकौ स्वभावतःपृथक्त्वंच
गुरुत्वंद्रवतापुनः २२ परत्वंचापरत्वंचस्नेहः।संस्कारइत्यपि धीद्वेषसुखदुःखेच्छाधर्माधर्मप्रयत्नकाः २३ संस्का

उक्तंज्ञानद्वैविध्यं सामान्यविशेषाभ्यानाविभजते॰३

षट्पदार्थतत्त्ववा
दी॰ वैद्य॰ः आस्तिक
राज्ञानादिभवादीन् ४
त्याद्युक्तोज्ञान ठक
संभावितिपदान्य
कुमाकं॰ आहेम २
सम॰ पंचिकादी
स्तीति सुपदेशस्य
३ मं परमाणु
जीवेज्ञानं ४
उदाह॰ २

गुणानामभिमानि २
भट्टाचार्यानुसारिणोमीमांसकाः ४
भावरूपाः ३ द्रव्याण्यभिमानानि॰ ३
आकाशादीनि २
अणुहस्वमहद्दीर्घमितिचतुर्विधंपरिमाणम्॰ २
एकत्वादिपरार्धा॰ २
पंचप्रमाणान्याह॰ ५ मीमांसकेकदेशी ५
प्रभाकरोश्रुतिप्रतिपत्तिमूलकत्वात्प्रमेयेचश्रुतांदृष्टी
यन्नाकेनेवैशेषिकमतमाह॰ ४
~~आकाश~~ शब्दादेरपाधेत्रयंकभेदवतोविना
नियोगिकंपरस्परंलांतरमासीतिदर्शय
वतइत्युक्तम्॥

उपसंहरति ३

समवायिनिर्वर्त्ततो संयोगो वर्त्तते तद्देवा । समवायि· कार्येण सहैकस्मिन्नर्थे समवेतत्वे सति कारणं तस्योदाहरणमित्युक्तं तन्तुसंयोगः पटस्य·
कार्यरूपो पटः । असमवायिकारणं संयोगः एकस्मिन्नर्थे तन्तुरूपे समवेतमिति· वा इत्यादीनां तन्तुपटयोः संयोगोऽसमवायिकारणम्
वोक्तिरिं कानि रत्नाय कार्येति· तन्तुसंयोगस्येव पटरूपे कार्ये सामर्थ्यं २ पटो स्व'रूपं प्रति समवायिकारणं पटाश्रयास्तन्तवः· तास्व
समवायिभिन्नं निमित्तं कारणं २
ततोऽसमवायिकारणं तन्तुरूपं वर्त्तते एव इतिकारणे न सहैकस्मिन्नर्थे समवेतत्वे सति कारणमसमवायिकारणमुदाहरणमिति ज्ञातव्यः २

१ परमाणुगता एव गुणा रूपरसादयः कार्ये समानजातीयमारभन्ते गुणान्तरम् २ कार्यं यत्र समवेतं तत्कारणं समवायि
तत्. चक्राद्यं साधनं यत्र घटस्यासमवायि तत् ३ समवायिनि तिष्ठत्समवायाश्रयेण तथा कार्ये वध्नत् सामर्थ्यं कथ्यते
असमवायि तत् ४ निमित्तं कारणं तेषामीश्वरश्च कुलालवत् यत्कार्यं जायते यस्मात्तस्मिंस्तन्न तिष्ठति ५ मृत्तिकायां
घटस्तन्तौ पटः स्वर्णेऽङ्गुलीयकम् इति वैशेषिकाः प्राहुस्तथा नैय्यायिका अपि ६ रजः सत्त्वं तमश्चेति प्रधानस्य गुणा
स्त्रयः रजो रक्तं चलं तेषु सत्त्वं शुक्लं प्रकाशकं ७ तमः कृष्णं चावरकं ८ बीजस्यांतरिवांकुरो जगदिदं प्राङ्निर्विकल्पं पुन
र्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतं मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया तस्मै श्रीगुरुमूर्तये नम
इदं श्रीदक्षिणामूर्तये ९ अस्यायमभिप्रायः अंकुरादिफलान्तेषु कार्येष्वस्तित्वमीक्ष्यते कुतस्त्यागतमसंवद्धाः वट
बीजेषु ते कणाः ९ कारणान्तर्गतं कार्यमिति सर्वैश्च संमतम् तस्मात्सत्तास्फुरणा च सर्वत्राप्यनुवर्त्तते १० पुष्पे फलत्व
मापन्ने क्षीरे च दधितां गते विजातीयाः प्रवर्त्तन्ते गुणा रूपरसादयः ११ कारणं कार्यसंबन्धौ जातिर्व्यक्तिर्गुणी गु

रक्तमुपरंजकं
अहंलघु ५
सं.प.ल:४

सांख्यमतमाह·४
ईश्वरस्य जगज्जनने
सहकार्यपेक्षाया
मङ्गीकारे वहानि
रनपेक्षायां दृष्ट
विरोध इत्याशंक्य
मायिकसहकारि
कल्पनान्नदोष
इत्याह ५
२०१

इत्यन्त रू ५+५ हेतवः ॥ इति सांख्याश्रयभाष्यं तेनैषां दूषणमुच्यते ॥८॥ बीजस्यान्त ५

परमकार्यरूपवटफलेषु परमाणुरूपाः कणाः कुतः)
संवृद्धः श्लाघकमात्रेऽन्वयसंभवेऽपि सर्वकार्याननुवृत्ते)
चाराबडउपादानमित्यर्थः २

मायासहकारिकस्य कारणत्वे दृष्टान्तौ) बकाराद्धे वक्ष्योगादयः २
वाह·४ मदुक्तमणुकारणकं न गाद्यतितदूजयति·३ सर्वेषां १

पूर्वपूर्वकार्यस्योत्तरोत्तरोपादा
नत्वेबाधकमाह·२

प्रकाशमात्रस्यापि कथं कारणत्वमित्याशंक्य माययासर्वविवर्ता
धिष्ठानत्वेनेत्याह·१

वि॰अ४

४२७१

~~२६५~~

आगमविधानम्

श्री ५ को सरकार

मं·को·
१

श्रीमन्मङ्गलमूर्तये नमः ॥ ॥ वर्णाः पंचाशता स्यादिविभक्त्यंतविग्रहा वाक्प्रसादाय मे संतु यान्मा
तृका विश्वमातृका· वर्णनिघंटमालोक्य सम्यक् कृत्यागमांतरात् वर्णाभिधानं विदधे श्रीविनायकशर्म
णा· २ ॐ। ॐकारः प्रणवस्तारस्त्रिमात्रो वर्तुलाख्यकः वेदादिः प्रणवः पंचदैवतस्त्रिदैवतः ३
आदिबीजं बिंदुशक्तिर्मंत्राद्यो ध्रुवबीजकं सावित्रमध्यमपरं गुणाद्याश्रितिस्थितिः ४ अ अः के
शवः स्यात् श्रीकण्ठो विष्णुरादिस्वरश्च सः पूर्णोदरी समाख्याता कीर्तिरप्येष कीर्तिता· वर्णा
द्य आद्यजश्चैकमात्रो ह्रस्वश्च रेफरः स्वराद्यो ग्रामणी वागीश्वरो ऽकारो ललाटजः ६ निवृत्तिश्च
द्योभातारश्च सारस्वत ललाटजः आ· आनंदनं प्रतिष्ठात्मा विश्वात्मा मुखनायकः ७ नारा
यणो मुखवृत्तो दीर्घच्छाया विधानकः द्वितीयश्च स्वरस्त्वाकारो दकजो दीर्घ एकजः· ८ इ सौरो दक्षि
णपादः स्यात् सूक्ष्मः कोनतरुर्मतिः ९ ई इः सूक्ष्मो माधवश्चंद्रो दक्षनेत्रः त्रिमूर्तिकः १० नेत्राख्यः कोटरी

९
राम:
१

िघात्तृतीयस्वरनासिके इकारः शाल्मलीत्वक्षाह्लादो दक्षिणलोचनः १० ई ईचतुर्थस्वरः शांतिस्त्रि
मूर्त्तिर्बिन्दुमालिनी मायागोविंद ईकारो वामनेत्रैच ह्रोस्वरः ११ उ शान्तिर्विष्णुर्भ्यलोलाक्षीतु शौर्जिह्वाख्य
नामकः बालिकाकूस्मृतो लक्ष्मीनामपर्याय एव च १२ ऊ ऊविष्णुरमेशाश्च कर्णा नाभीषणी ऋषः ऋ
स्यकर्णः कर्णाद्दक्षऊकार पंचमस्वरः १३ वर्त्तुलाक्षी च षड्क्रूक ईधिका मोहिनी च ऋतिः ऊनः स्मृतिः ऊवः
स्लोतो मोहको मोहनो पिव १४ ऊ ऊ कांतिर्वामकर्णस्यो स्म धीशो मधुसूदनः षष्ठस्वरः स्तथोका
रः प्रजेशोनवभैरवः १५ दीपिकादीर्घघोणा वरूढ्ः सव्यश्च वोपिव ऋ ऋभारभूतिभीस्त्य दक्ष
नाशा त्रिविक्रमः १६ ह्रियानिवृत्तिर्नामास्य ऋकारसप्तमस्वरः शिरोमाला दीर्घमुखीरे विकारद्ध
एकपात् १७ ऋ निर्ज्जिरो गोमुखी स्याद्वाम्भनो वामनासिका मायाग्निरुद्रमूर्त्तिः स्याद्वामनाक्षापुटा
मिधः १८ ऌ ऌ [illegible] धर्मो दीर्घजिह्वा स्यात्युर्मेधाव पार्थिवः दक्षगांडो गंडनासा ऌकारो नवमस्वरः।

१९ स्तुस्मवक्त्रोगारुत्वरोमायेंद्रेजंगलःस्मृतः । विद्याधरःकपोलाख्यःस्याद्दक्षिणकपोलकं २० ॡका
रो ॡहषिकेशो हांडो ह्रीहरः सूक्ष्मामृतास्त्रुजो लोलुपो दशमस्वरः २१ नीलपादो वामगंडः
ल्स्याद्वामकपोलकः मण्डविद्याकोमायेंद्रः शांतिस्तस्त्वपिरामतः २२ एरुद्रक्षिप्स्वाक्षिंठीशस्त्वोष्ठ
नामाभगाहूयः अग्निःशांकिर्दक्षजानुर्ज्ञानशक्तिर्ध्वजंघजः २३ ऊर्ध्वशक्तिस्तथैकारः स्मेकादशा
मस्वरः स्तानश्वपन्नामस्मुरूर्ध्वदंतः क्वचित्स्मृतः २४ ऐ ऐमौक्तिकोधोलज्जाग्निश्चवागोष्ठकयाम
कः तामोदरोवाग्भवाख्यःपीठेशस्तोक्षमान्मतः २५ द्वादशस्वरऐकारोमृतावोत्पुत्तमस्त्वपि · क्षमा
तकोवामजानुज्ञाघोणिर्धेनुस्वरः २६ क्वचित्साधरदंतश्चवाक्सारस्वतईरितः स्त्रो स्रोसद्यःसघो
जातश्चगायत्रीदक्षजंघकः २७ ऊर्ध्वदंतोदंतनामालक्ष्मीर्ज्वालाकृत्वीरतिः वासुदेवःपश्चिम
स्यापोष्टपृष्ठोनेत्राद्यत्यपि · २८ नयोदशस्वरश्चांपांर्यतोकारश्चकुज्वचित्त ऊर्ध्वास्मोष्टना

मारव्यकंठाख्यः परिकीर्त्तितः ऐ ऐश्शांतिकोनुग्महेशस्तेजश्चोवामजंघकः संकर्षणाश्चकंठाख्योनाद
ल्यश्च सरस्वती ३० चतुर्दशस्वरश्चोत्कामुखोकारः सदाशिवः मनुस्वरोधोदंनाख्योव्यापिनीदशमस्व
रः ३१ कविनस्यादधरोष्ठाख्योप्यधश्चोमोमन्तर्मतिः अं अं दंडोघंटिकानादोदंघ्रं स्त्रात्न वः पुमान्त ।
३२ वंडपावीजयोनिः स्पान्तोरव्योदुःखश्चवंधकः श्रीमुखीविंदुरिदुश्च प्रद्युम्नः कामदस्यकः ३३ आत्मा
रूपोदीर्घनामानुस्वारो व्योमरूपिका पुरुषाख्यः शिवः प्रीतिरविपंचदशस्वरः ३४ अः अः आद्यांको
महासेनोद्विविन्दुः प्रकृतीरतिः रुद्राभद्रोनिरुद्रश्च विघाजरव्मृत घंटिकाः ३५ अमरेशोहिजिह्वाख्यो
हरिः सर्गोविसर्गकः अनंतशक्तिरित्युक्तः षोडशस्वर इत्यपि ३६ कः कः क्रोधीशोमहाकालीजयाव
कीहुताशनः दक्षस्कंधः स्कंधनामामंन्मथस्तेजसोंतिकं ३७ वाहुमूलाहृयोदक्षंवाहुमूलश्चमा
दनः ३८ गजापत्याहृयःस्टष्टिः कापालीविंदुमालिनी वामदेवोनकोहृदः ककारः क्रोधनायकः ३९

ख· खचंडेश्वो गदी दुर्गा दक्षवाहुः सरस्वती कक्षकूर्परकेश्वल्पः कूर्पराख्यः ककारकः ४० कपाली दंपजानी
शः शिरंश्चाकाशनामकः ऋद्धिश्च कालरूपी च वाहुमध्यागहस्त्यपि ४१ गः गस्यात्पंचानको दक्षकूर्परांतश्च कंक-
णः सभागरोम्भरः शार्ङ्गी शिवदर्शनसंज्ञकः ४२ गोद्विजाख्यो गोन्वरश्च गणाध्यक्षश्च तीरितः सर्वसिद्धिर्गिका-
र्थश्च स्मृतिरूपश्च सर्वगः ४३ घः घंटहस्तो दक्षकरः कालरूपी शिवोत्तमः खड्गी सत्या घोरनामा मेधा गौरी
घकारकः ४४ शिवात्मांगुलीमूलश्च दांतको घुर्घुरोपि च· ङ· ङ· द्विजात्मेकारूपश्च वक्षहस्तांगुलीनखः ४५
पतिस्त्रैलोक्यविद्या च एकनेत्रा ह्रूपस्तथा· च· कूर्मो मंत्रशक्तिः स्याद्धर्मदंडधरो हली वाशिलक्ष्मी
चंडरूपो वामस्कंधाख्यनामकः ४६ नतीयल्लोचनो सव्यवाहुमूलो द्विनेत्रकः छलांगली दीर्घवा- २।।
डरेकनेत्रो विशालिनी ४७ एकवामपङ्गुणान्तिरेकपादः पङ्गुर्द्युतिः छ· छकारो मूलवली वामकूर्परो
मंत्रशक्तिका ४८ द्विशिरश्च तथा सव्यभुजमध्यगतोपि च· जाम्रकंकणः शल्ली त्रिशल्ली विजया

स्थिरा ४९ आत्मशक्तिर्दीर्घबाहुर्जयंतश्चतुराननः भगनामा जकारश्च स्यावोक्ता वैवकर्त्री ५० फ फ
जिह्वा वामहस्तश्च विजयाख्यन मंडलः पाशी लंबोदरी नामशाखा वामूलो झकारकः ५१ आकल्पनश्च म्ह
कारीत्याश्चिभिरजेश्वः दीर्घबाहुश्लोकरूपं नाद देवो निरंजनः ५२ ञ ञसर्वोद्रा विशाखी विश्वा वामक
रांगुलीनखः धर्मदः सुखदो ज्ञानी ब्रह्मानो सिद्धिरंगुली ५३ एकपादो ञकारश्च दुर्गतीनी वामशाखि
का ट टंकारः सोमनाथो मुकुंदो विनदजरा ५४ दक्षिकटि दक्षिणा स्फिक् कपाली वपिनागरी प
दमूलो दक्षपादमूलो वामकरोटिका ५५ सोमेश्वरो हुवं द्रष्ट्र ठकारश्च पुनर्नवः ठ ठलांगुली पूर्णांचं
द्रः खेचरी विनदात्राश्री ५६ नंदजो वज्रिलो ह्नज्ञोऽमृता गश्चो दक्षजानुकः वनजो जीवजो भ्रीबो दक्षोरु
र्विघ्नपूर्णिकः ५७ ढकारश्चालिनी व्यापिनत्याकरनलाहृयः ड डदारुकश्च निनन्दी मंजरी द
क्षगुल्फगः ५८ बलापको वामवाडु डकारो योगिनीप्रियः शांतिर्दक्षिणजंघाश्चा योगिनी हृद

मं·को·
४

यगमः ५८ ठ ठकारोर्द्धनारीश्वोप्यपिगौवविनायकः ऐश्वरीसिद्धिदानाचविघ्नेशः सव्यबाहुकः ६० सिद्धि
नेरो दक्षपादो दक्षिणांघ्रिर्गणाधिपः ण णा दक्षपादांगुलिको द्विनेत्रो योगिनीप्रियः ६१ दक्षपादाहूय
श्चापि समृद्धिः काकोदरी हरिः त्रापाठश्चो वामत्रात्रि तारास्वाती तारकोपि च ६२ उरुद्वयात्मकश्चोरु
मूलश्च मध्यवर्णकः शक्रीशः कामिका वामयन्त्रलतिस्थि जटी स्मृतः ६४ ध्य·ध्य दंडी पूतनात्मको वा
मोरुर्वामजानुकः महाग्रन्थिश्च दंडोऽर्थोग्निस्थिता ह्रकश्च ह्यपि ६५ पशिनीश्रिरजो मुक्तिस्थ्यकारो वरदो
पि च · द द वामजानुः कूर्मेशो दानाधाताववदात्मकः ६६ वं डलो वामगुल्फश्च ह्लादिनी वर्मनामकः सत्य
धृतिर्दक्षपादो दकारो भद्रकालिका ध ध वामजंघा राल्वणश्च मतिः श्रीनिनेश्वरः । प्रियश्च दर्शनो नेत्र
हं धनाभाश्चमाश्वतः ६८ स्थाणुर्मीनेश्वरो मीनो धकारो योगिनीत्यपि · न · नमेषो वामपादश्रीवा
मीशोरिश्च दन्तुरः ६९ ऊर्द्धवामीनादे दवः क्षपादो दीर्घो निरञ्जनः नकारश्चांशिनी चापि नादिनी

राम·
४

212

नादरूपकः १०प पलोहितो दक्षपार्श्वो दक्षकुक्षिश्च गर्जिनी कुक्षिंपार्श्वो निरीहश्चोग्रहृत्कर्त्ता पकारकः
११ तपनः पंचमः ऽघोरो रमातीक्ष्णा सदाशिवः पार्वती हृदयश्चापि शिव इत्यपि कीर्त्तितः १२ फ· फः शिखी का
लरात्रिमाया वामपार्श्वो जनार्दनः वामपादो नंदिपादः फेत्कारो डाकिनीप्रियः १३ डाकिनी वह्नभो रौद्री
फकारश्चिष्य एव च· व· वकुण्डलिनी पूज्यवंशो ह्यगालंडो युगंधरः १४ शिखिवाहो मुखविंदो वलिर्ज्ञी श्रोव
लिप्रियः यो ह्यावात्मा कलेश्वेदिन्म्य धिभूधरसंज्ञकः १५ वकाराख्योभयाख्यात्तु ह्यव इत्यपि कीर्त्तितः भाद्वि
रंडो यशोनामिर्द्दन भ दुष्ट भीषणाः १६ दक्षस्कंधो महावाहुः क्लिन्नानि द्राकपर्द्दिनी· भ· भकारो भामवो
भीमो विश्वमूर्त्तिस्वना द्रुपः १७ म· म महाकाल उन्मात्तः काली वज्रान्तरो वरं कालाख्यो हृषितः कालो भ्य
दुष्टापि यमो विषं १८ तंत्रीमकारः शुभरूपो वैकुंठो वसुदो रविः य· य द्दवालीशानः कुद्दाली
ग्रो वाभु संज्ञकः १९ शंकुभद्रो जया वाणं वेगी वज्ररूपोत्तमः लक्ष्मीर्लसेत्ताणो वसुधा प्राणाः शीघ्रश्च

सं·को· प्राणिसेयकः ८० र· रक्तनामा सुमुखः स्त्री रेफः परावली भुजंगोऽरविर्वह्निः स्थलदंतश्च दीपकः ८१ दक्षिणांसो
५ हंसनामा क्रोधनी तेजसाह्वयः ल· लः पिनाकीशो नाकीशः कीपार्श्वं ज्योधमानलः ८२ कंदः परापरापृथ्वी विना
वह्नावसुधो वसुधा· रेवती शक्रनामा त्वमेः पृतनामांससंज्ञकः ८३ लकारः कुटिलश्चापि जितनी पंचयकलस्था सुधारः
पीनः शिथिलः पीताख्यश्चापि लंबकः ८४ व· वरवक्रुष्ठारक्षभानुर्मदोयामांसकः शुचिः जलनामामृतास्य
श्च वज्रक्षिफस्तुलसंज्ञकः ८५ श· शांकः सागरः सूक्ष्मो कारी बालश्च माधवी वकारो वरुणश्चापिश्च गगनावी
संज्ञकः ८६ श· शःशांतवक्रोऽस्थिभानुश्च मन्मथः कुसुमायुधः कामरूपः कामरूपी सोरव्यदानाशुचिर्बकः ८७
श्रीकंठो वारुणी संध्या हंसग्रोमृत्युकारकः दंभहृत्सर्वदाकृष्णवामोरुश्च विशोषकः ८८ ष· षष्ठोनंतमा
मर्योग्निर्मज्जा पीनाविनायकः कालधर्मः षकारश्च वायवी जठरो वृषः ८९ प्रलयानलं घोरराज्यश्चयमः राम:
कालांतकाह्वयः स· सदाशिवो भृगुः शुक्रो हंसो रक्षो वदारिणी ९० श्वेतास्यः कुंडलः शक्तिसंज्ञकश्च ५

213

दुसंज्ञकः प्रकृतिश्च जगद्बीजं परमात्मा मन्तात्मकः ९१ सकारश्चन्द्रपिंडश्च जीवकुंडलकः प्रभा· ह हवाराहो
लिङ्गशान्तो नाकुलो नकुलीश्वरः ९२ हकारःप्राणमाजीवात्मा काशनामा शिवाह्वयः मादनः सहजा लक्ष्मीप्रा
णो हंसोरुणावरः ९३ नादघोषप्राया संधिरस्त्रो व्योमसंज्ञकः ल लशिरो विमलो मोघो लकारो व्या
पिकाप्रिता· ९४ क्षक्रोधनामा संहारो नंता संवर्तकः भयः नृसिंहः व्योमहलतेजाः क्षकारो नलमंडलः
९५ संयोगजः सवर्णान्तः सर्वांगो रोमसानुगः मेरुवंव्योडुगान्तश्च वर्णान्तल्लुंडरूपरः ९६ सर्वान्तिकोऽन्तिकः
प्रोक्तो विद्युती मातृकान्तिकः॥ ॥ ह्रीं इत्येतस्य निर्देशो हृल्लेखा भुवनेश्वरी ९७ मायाशक्त्या
ख्ययाख्येयः क्लिं वास्य मदनाह्वयः श्रीं वाच्या कमलानामा फ्रेंकार इति निर्दिशेत् ९८ आं पाशो
नांकुशेन क्रौं गं गणेशेन निर्दिशेत्· प्रसादेन हौं वाग्भवेन नाम्ना ऐं इति स्मृतम्· ९९ आत्मना
हंस इत्येवमजा इति प्रकीर्तितः परमात्मा सोहमिति बीजं च वज्रः कलं १०० भूमिबीजं पिंड

मं·को·
६

वीजंक्लौंवर्गपंचजनान्वितं । कूटद्वयसुपनेहयक्रौंवपिंडवीजंवपिंडकं १ क्षत्रंतुयुरुद्वयुक्तंन्तसिंहाख्यं
क्ष्रौंइति चिंतामणिः स्फ्रें दीर्घहुंहुं वराहाख्यमिरितम् । २ हैंसूहयग्रीवसंज्ञंविश्ववीजंतुश्रीमिति ह
दाख्ययानमोनत्याशिरोनाम्नाद्विठंतव · ३ वह्निवीजाख्ययास्वाहावषट्तुवीजंशिखाख्यया ।
नेत्राख्ययावौषडिति हुं कौचकवचाख्यया · ४ फट्द्वयास्त्राख्यरैहेतिसंज्ञयाज्ञायतेवुधै दिक्षा
त्रमल्पवुद्धीनांमोक्षवोधायकीर्तितम् · अन्यदप्यत्रविज्ञेयमागमान्तरदर्शनात् · मननंसर्वध
र्माणांत्राणांसंसारवृत्तग्रहः ६ मननात्राणधर्मत्वान्मंत्रमित्यभिधीयते · अनेनयुक्तिप्रदामंत्राग
प्रयुक्ताःसर्वकर्मसु ७ धातुःशब्दनिवेधार्थःस्यान्मंत्रगुप्तभाषणो · मनोविदितसंज्ञाभिर्नादि
श्वास्फुटताभवेत् · तंगोप्यफलासिद्धिस्तुभवेन्मंत्रस्यगोपनात् · लघ्वागाद्यन्तसंकेन
शव्देनकृतमानसः आगमेसर्वतंत्राणांनिर्देशंप्रययेशिव · इतिश्रीविनायकभट्टविरचित

पागमाविधानंसप्रशांमि

रामः
६
२१५

१६२

८२९८

लक्षहोमको पीठोमादेखि [illegible]न्त गोदानादिकर्मविधिः ।

आदौयज्ञसमाप्तिकर्माधिकारसिद्ध्ये गोदानम्॥ आचम्य कर्मपात्रंकृत्वा. ॐ अपवित्रः पवि
त्रोवेति संप्रोक्ष्य. ॐ नमोगोभ्यःश्रीमतीभ्य० इतिगाम्. नमोब्रह्मण्यदेवायेति ब्राह्मणं च स
म्पूज्य. सङ्कल्पंकुर्यात्. यथा— हरिः ॐ तत्सत् विष्णुः३ श्रीमतो भगवतो महापुरुषस्य वि
ष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे
वैवस्वतमन्वन्तरे अष्टाविंशतितमेयुगे प्रह्लादाधिपत्ये मनोसप्तमे सत्यत्रेताद्वापरान्तेकलियु
गस्य प्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तान्तर्गत हिमवत्पर्वतैकदेशे गङ्गादेव्या उत्तरकोणे
नेपालाख्ये पाशुपतक्षेत्रे श्रीवाग्मतीतट निकटे इहपुण्यभूमौ षष्टिसंवत्सराणांमध्ये अमुक
संवत्सरे श्रीसूर्येमुकायने अमुकर्त्तौ मासोत्तमे अमुकेमासि अमुकेपक्षे अमुकराशिस्थे सूर्ये
अमुकराशिस्थे गुरौ अमुकराशिस्थेचन्द्रे शेषेषु ग्रहेषु यथायथ स्थानस्थितेषु सत्सु एवंग्रह

गुणयोगविशिष्टायां अमुकवासरान्वितायां ममुकपुण्यतिथौ अमुकगोत्रः अमुकप्रवरः सपत्नीपु
त्रपरिवारो अमुकोहं मम· अमुककर्मणि भक्ष्याभक्ष्य वाच्यावाच्य कर्तव्याकर्तव्यादि विचाराभा
वजनित्त भोजन शयन विहार व्यवहारादिगत शास्त्रोक्त सर्व सन्नियमाकरण जन्य प्रत्यवायपरि
हारद्वारा परिसमापितैतत् अमुककर्मोत्तराङ्ग· भूत तत्तद्देवतापूजन दक्षिणादान यज्ञान्तस्नान
मण्डपदानान्त ममस्तकर्माधिकार सिद्धये शरीर शुद्ध्यर्थमिदं गोप्रत्याम्नाय रजत द्रव्यं चन्द्रदै
वत ममुक गोत्रायेत्यादि० प्रार्थना - कपिले सर्वदेवानां० दानप्रतिष्ठा - कृतैतद्गोप्रत्याम्नायद्र
व्यदानप्रतिष्ठार्थं० ततः पूर्णपात्रदानम् - अद्येहेत्यादि देशकालौ संकीर्त्य· अहंमम अमुकानु
ष्ठानाङ्ग·भूत स्विष्टकृद्धोमान्त तत्तद्देवताहवनकर्मणः पूजनकर्मणश्च साङ्गता सिद्ध्यर्थं कृताकृ
तावेक्षणरूप ब्रह्मकर्मप्रतिष्ठार्थं मपूर्ण पूरणार्थमिदं (षट्पञ्चाशदधिकद्विशतमुष्टिमितं) त

ण्डुल पूर्णपात्रं सदक्षिणं प्रजापतिदैवत ममुकगोत्राय अमुकशर्मणे ब्रह्मणे तुभ्यमहं संप्रददे· इति
दद्यात·। ततः ॐ सुमित्रियान आपओसधयः सन्तु· इत्यनेन पवित्राभ्यां प्रणितोदकेन यजमा
नशिरः संमृज्य– ॐ दुर्मित्रियास्तस्मैसन्तु योस्मान्द्वेष्टि यञ्चवयं द्विष्मः इत्यनेनैशान्यां प्रणी
ताविमोकः॥ ततस्तरणक्रमेण वर्हिरुत्थाप्याज्येनाभिघार्य· ॐ देवागातुविदोगातुं वित्वागा
तुमित। मनसस्पत इमं देवयज्ञंꣳ· स्वाहावातेधाः· इतिहस्तेनवर्हीषिजुहुयात॥ अथमेधा–
ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्यकाम्यम्। सनिंमेधामयासिषꣳ· स्वाहा· यांमेधांदेवगणाः
पितरश्चोपासते· तयामामद्यमेधयाग्नेमेधाविनंकुरुस्वाहा· मेधांमेवरुणोददातु मेधामग्निः
प्रजापतिः· मेधामिन्द्रश्चवायुश्चमेधांधाता ददधातुमेस्वाहा· इदंमेब्रह्मचक्षत्रंचोभेश्रियमश्नु
ताम्· मयिदेवा दधतु श्रियमुत्तमां तस्यैते स्वाहा॥ अत्र समुद्रादूर्मिसहितेन अनेन मंत्रेण

पूर्णाहुतिरिति रत्नावलीकारः ॥ ततो वसोर्धाराइतिकश्चित् ॥ ततोवस्त्रहोमः — एधोस्येधि
षीमहि समिदसितेजोसितेजोमयिधेहि. समाववर्तिपृथिवी समुषाः समुसूर्य्यः. समुविश्वमि
दं जगत्. वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥ ततः शेषचरुहोमः — अ
भ्याददामि समिधमग्ने व्रतपते त्वयि. व्रतञ्च श्रद्धाञ्चोपैमीन्धेत्वा दीक्षितो अहम्. स्वाहा ॥
अङ्गालम्भनम् — श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं बलं श्रियम्. आयुष्यं द्रव्यमारोग्यं देहि
मे हव्यवाहन. त्वदर्थोयं समारम्भः कृष्णवर्त्मन्नमोस्तुते. इतिनमस्कृत्य. अमुखमग्नोपा
णी प्रतप्य. ॐ तनूपा अग्नेसितन्वं मे पाहि. ॐ आयुर्दा अग्नेस्यायुर्मे देहि. ॐ वर्चोदा अग्नेसि
वर्चोमेदेहि. अग्नेयन्मे तन्वा ऊनन्तन्म आपृण. मेधां मे देवः सविता आदधातु. मेधां मे देवी सर
स्वती आदधातु. मेधामश्विनौ देवा वाधत्तां पुष्करस्रजौ. ॐ अङ्गानि च मम आप्यायताम्. इति

सर्वाङ्गे। वाक्चमआप्यायताम् इतिमुखे। प्राणश्चमआप्यायताम्. इतिनासिकायाम्.। चक्षुश्चमआप्यायताम् इतिनेत्रयोः। श्रोत्रश्चमआप्यायताम्. इतिश्रोत्रयोः। यशोवलञ्च आप्यायताम्. इतिवाह्वोः॥ ततो घृतछाया — ॐ ध्रुवासि ध्रुवोयं यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात्। घृतेनद्यावापृथिवीपूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया. इति घृतमालोक्य निरीक्षेत.। अलक्ष्मीर्यच्च दौःस्थ्यंमे सर्वगात्रेष्ववस्थितम्. तत्सर्वंसमयाज्यत्वं लक्ष्मींपुष्टींच वर्द्धय.। काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि. एवानोदूर्वे प्रतनु सहस्रेणशतेनच। याक्षीरसागरोत्पन्ना दूर्वापीयूषसंभवा. तासांस्पर्शनमात्रेण आयुर्वृद्धिर्यशोवलम्। इत्यभिमंत्र्य. ॐ तेजोसीति परमेष्ठी ऋषि राज्यं देवता गायत्री छन्दः आज्यावेक्षणे विनियोगः। ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासि. प्रियंदेवानामनाधृष्टं देवयजनमसि॥

इतिछायांपश्येत। अद्येहेत्यादि अमुकगोत्रस्य अमुकवर्मणः सपरिवारस्यममदीर्घायुरा
रोग्यहर्षविजय प्रज्ञाक्षेमादिसकलाभीष्टसिद्ध्यै अमुककर्मणः इदमवलोकितमाज्यं मृत्यु
ञ्जयदेवताकं हिरण्यंवाह्निदेवताकं कांस्यपात्रं विश्वकर्मदैवतं महामृत्युञ्जयप्रीतये अमुकगो
त्राय अमुकशर्मणे ब्राह्मणे तुभ्यमहं संप्रददे. प्रार्थना — कामधेनोः समुद्भूतं देवानामुत्तमं ह
विः, आयुर्वृद्धिकरं दातृ राज्यंपातुसदैवमे।। कृतैतत्सुवर्णकांस्यपात्रघृतदानकर्मणः प्रतिष्ठा
साङ्गतासिद्ध्यर्थमिमांदक्षिणां रजतं चन्द्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणेतुभ्यमहंसंप्रददे।
इतिदद्यात।। छायादर्शनंपापनाशनमरिष्टहन्तृ ।। यज्ञान्तगोदानम् — गां ब्राह्मणं च सम्पूज्य.
अद्येहेत्यादि अहंमम अमुककर्मणः समस्तन्यूनातिरिक्तत्वदोषध्वंसनपूर्वक यज्ञसाद्गु
ण्यसिद्धिद्वारा श्रुतिस्मृतिपुराणागमोक्त साङ्गोपाङ्गफलप्राप्तये इमांस्वर्णशृङ्गीं रौप्यखुरां

ताम्रपृष्ठां पयस्विनीं सालङ्कारां सुपूजितां गां रुद्रदेवताकां (तन्मूल्योपकल्पितं द्रव्यं चन्द्रदेव
ताकं) अमुकगोत्रायामुकशर्मणे आचार्याय तुभ्यमहं संप्रददे. । यज्ञसाधनभूताया विश्व
स्याघप्रणाशिनी । विश्वरूपधरो देवः प्रीयतामनया गवा ॥ कृतैतद्यज्ञान्तगोदानकर्मणः प्र
तिष्ठासाङ्गतासिद्ध्यर्थं इदं रजतं चन्द्रदैवतं अमुकगोत्रायामुकशर्मणे तुभ्यमहं संप्रददे तत्सन्नम
म. इतिदद्यात्.॥ ॥ ततः ऋत्विगाचार्यः(पुण्याहवाचनं कृत्वा) कुण्डस्येशानभागे वेद्याः प
श्चिमतो भद्रासनोपरिस्थितं प्राङ्मुखं सपत्नीकं यजमानमुदङ्मुखा ऋत्विजः ग्रहकलशोदकेन
द्वारकलशोदकेन कुण्डकलशोदकेन च. देवस्यत्वा. समुद्रज्येष्ठाः. त्रायन्तां. इमा आप इत्यादि
भिः अब्लिङ्गाभिर्वारुणीभिः पावमानीभिर्ग्रहमंत्रैः सुरास्त्वेत्यादि पौराणिकमंत्रैश्चाभिषिञ्चेयुः॥
अभिषेके तु पत्नी वामभागे स्यात्॥ ॥ तत उत्तराङ्गपूजा— गणपतये नमः ब्रह्मादिभ्यो नमः

आदित्यादिनवग्रहेभ्योनमः। ईश्वराद्यधिदेवताभ्योनमः. अग्न्यादिप्रत्यधिदेवताभ्योनमः. विनायकादिलोकपालेभ्योनमः. इन्द्रादिदिक्पालेभ्योनमः ग्रहमण्डलोपरिकलशोपरिचावाहितदेवताभ्योनमः: गरुत्मतेनमः. सावरणप्रधानदेवतायैनमः। इति गन्धपुष्पाक्षतधूपदीपनैवेद्यादीनि यथासंभवं समर्प्य नीराजनां कुर्यात्.॥

॥ तत आचार्यायदेवप्रतिमादानम् —

अहंमम तत्तद्देवताप्रसादसिद्ध्ये अमुककर्माङ्गत्वेन तत्तत्स्थानस्थापित गणपतिमातृकावास्तुदेवता मण्डपदेवता ग्रहाधिदेवता प्रत्यधिदेवतादीनां गरुडस्यच सुपूजित सौवर्णप्रतिमाभिः समन्वितामिमां अमुकप्रतिमां सोपस्करां अमुकगोत्रायामुकशर्मणे आचार्याय तुभ्यमहं संप्रददे. आचार्यः कोदात्कस्मा अदादिति पठेत्। अद्यकृतैतत् अमुकप्रतिमादानकर्मणःप्रतिष्ठासाङ्गतासिद्ध्यर्थमिदं सुवर्णवह्निदैवतं अमुकगोत्रायामुकशर्मणे आचार्याय दानप्रतिष्ठा

त्वेनतुभ्यमहंसंप्रददे. इतिदानप्रतिष्ठांचदद्यात्॥ ततोहोमदक्षिणादानम् - यथा अग्नेः पश्चिमभागमागत्य प्राङ्मुखोपविष्ट. उदङ्मुखेभ्य आचार्यऋत्विग्भ्योदक्षिणांदद्यात्। हिरण्यगर्भेतिदेयद्रव्यायनमः. इतिदेयद्रव्यंसम्पूज्य. अद्येहेत्यादि अमुकवर्मा सपत्नीपुत्रपरिवारोहं मम अमुककर्मणः समस्तशुभफलप्राप्त्यै आचार्य ब्रह्मगणपतिसदस्य होतृत्विग्जापक द्वारपाल द्वारा कृतस्य मण्डपस्थापित गणपत्यादि तत्तद्देवता सहित प्रधानदेवता पूजन तत्तत्सूक्तपाठ पूर्वकं चर्वाज्यादि द्रव्यैस्तत्तद्देवतानां होमकर्मणः कृतस्य साद्गुण्य सिद्धिपूर्वकं यथोक्ताभिलषित फलप्राप्त्यै आचार्य दक्षिणात्वेन ब्रह्मगणपतिसदस्यहोतृत्विग्जापक द्वारपाल परिचारक दक्षिणात्वेन भूमितुरगरथगृह सोपस्करशय्या वस्त्रालङ्कारादि निष्क्रयत्वेन चोपकल्पितमिदं रौप्यं चन्द्रदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो आ

चार्य ब्रह्म गणपति सदस्य होतृत्विग्जापक द्वारपाल परिचारकेभ्यो यथाभागं विभज्य
दातुं जले हमुत्सृजे. तत्सन्नमम ॥ कृतैतत् भूम्यादि निष्क्रय द्रव्य दानकर्मणः प्रतिष्ठा
साङ्गता सिद्ध्यर्थं रजतं चन्द्रदैवतं नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो
यथाभागं विभज्य दातुमहमुत्सृजे. तत्सन्नमम.॥ ततो भोजन सङ्कल्पः — अमुक
कर्मणि न्यूनतातिरेकादि समस्तदोषध्वंसन पूर्वकं साद्गुण्य सिद्धिद्वारा साङ्गोपाङ्ग
फल प्राप्त्यै नानानामगोत्रान् अमुकसंख्याक ब्राह्मणानेभिश्चन्दनादिभिर्वृत्वा
यथासम्पादित मिष्टान्न ताम्बूलादिना अद्याहं भोजयिष्ये. तद्भोजनकर्तृभ्यो ब्राह्म
णेभ्यो भोजन दक्षिणात्वेनेदं रजतं चन्द्रदैवतं यथाभागं विभज्य दातुमहमुत्सृजे. तत्स
न्नमम.॥ कुमारीकुमारपूजनम् — सभ्रातृपत्नीपुत्रपरिवारोहं मम प्रधान सङ्कल्पो

५

219

च्छ नानाविधानिष्ट निरसन पूर्वकं दीर्घायुरारोग्यहर्ष विजय राजप्रजा क्षेमादि सकला
भीष्ट सिद्ध्ये अमुककर्मण उत्तराङ्गत्वेन (कल्याणी रोहिणी काली चण्डी शाम्भवी
दुर्गा भद्रा जयन्ती मङ्गला) देवीरूपाणा मासां नवविप्रकुमारीणां. एतस्य विप्रकुमार
स्यच. परिधानीयवस्त्र कुङ्कुम सिन्दूरादि सौभाग्यद्रव्य धूपदीपनैवेद्य भूषण भोजन
दक्षिणादिभि यथामिलितोपचारैः पूजनमहंकरिष्ये. इतिसङ्कल्प्य पूजयेत. मंत्राक्षर
मयींलक्ष्मीं मातृणांरूपधारिणीम्. नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहम्: ज
गत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि. पूजांगृहाणकौमारि जगन्मातर्नमोस्तुते. कुमा
र्यैनमः. वटुकायनमः इतिपूजयेत॥ ततोभूयसीदक्षिणादानम्— हिरण्यगर्भेति
देयद्रव्यंसम्पूज्य. अमुककर्माङ्गत्वेन अखण्डदीप कलश गणेश मातृका वास्तुग्रहाधिदे

वता प्रत्यधिदेवता मण्डपदेवतावरणदेवता प्रधानदेवतादि स्थापन नित्यार्चन तत्तत्सूक्त
पाठादि पूर्वक माचार्यर्त्विगादिद्वारा कारितेस्मिन्कर्मणि मन्त्रवर्णोच्चारण वैकल्प निय
मद्रव्य श्रद्धा दक्षिणादि वैकल्प जनित न्यूनातिरिक्तत्वादि समस्तदोष ध्वंसन पूर्वकं यज्ञ
साद्गुण्य सिद्धिद्वारा कल्पोक्त साङ्गोपाङ्ग फलप्राप्तये इमां रजतरूपां भूयसीं दक्षिणां च
न्द्रदेवताकां नानानामगोत्रेभ्यो आचार्यब्रह्मगणपति सदस्य होतृत्विग्जापक द्वारपाल
परिचारकेभ्योऽन्येभ्यश्च ब्राह्मणेभ्यो यथाभागं विभज्य भूयसीत्वेन दातुमहमुत्सृजे. ततो
ग्निं संपूज्य. ईशानदिग्भागात्स्रुचा स्रुवेण वा भस्म आहृत्य विभूतिं धारयेत्.॥ ततः – गच्छ
गच्छेति०॥ यान्तु देवेति०॥ ततः तिलकमंत्र पाठादिकं कुर्युः – आब्रह्मन्. दीर्घायुस्त. मन
सः. पुनस्त्वा० श्रीवर्चस्व० मंत्रार्थाः सफला० भद्रमस्तु० वाल्केत्त – यावद्गङ्गाकुरुक्षेत्रे या

वन्नभसितारकाः .यावद्ग्रामकथाल्लोके तावज्जीवतुवालकः इति ॥ येनवद्धोवलीराजेतिरक्षां
वध्वा ।त्र्यायुषंजमदग्नेः इतिललाटे । कश्यपस्यत्र्यायुषम्. इतिग्रीवायाम् । यद्देवेषुत्र्यायुषम्
इतिदक्षिणांशे । तन्नोअस्तुत्र्यायुषम् इति हृदि । भस्मतिलकंपरिधापयेत् ॥ ततोमण्डप
दानम् –पश्चिमद्वारदेहलीं गृहीत्वा– अद्येत्यादि अहं श्रुतिस्मृतिपुराणागमोक्तफला
वाप्तये अमुकयज्ञीयं ध्वजपताकातोरणादियुतं सपरिच्छदं दीपकलशगणेशग्रहवेदीवा
स्तुवेदी होमवेदी प्रधानदेवतावेदीसहितमिदं मण्डपं विश्वकर्मदैवतं अमुकगोत्रायामुकशर्म
णे आचार्याय तुभ्यमहं सम्प्रददे.. अनेन मण्डपदानेन अमुक प्रीयताम् । कृतैतन्मण्डपदान
कर्मणः प्रतिष्ठासाङ्गतासिद्ध्यर्थमिदं रजतं चन्द्रदैवतं (सुवर्णं वह्निदैवतं) अमुकगोत्रायामुका
चार्याय तुभ्यमहं संप्रददे.॥ ततो यजमानो अञ्जलिं वध्वा ब्राह्मणान् प्रार्थयेत्– कर्मण्यास्मि

न्मयाविप्रा अज्ञानाद्वा प्रमादतः। अकृतंवाकृतंवापि तत्सर्वं पूर्णमस्तुमे ॥ ततोयजमानः कर
संपुटं विधाय परमेश्वरं प्रार्थयेत् — यस्यस्मृत्या चनामोक्त्यातपोयज्ञक्रियादिषु। न्यूनं सं
पूर्णतांयाति सद्योवन्देतमच्युतम्। प्रमादात्कुर्वतांकर्म प्रच्यवेताध्वरेषुच। स्मरणादेवतद्वि
ष्णोः संपूर्णंस्यादितिश्रुतिः॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यांपञ्चभिरेवच। हूयतेचपुनर्द्वाभ्यां
समेविष्णुः प्रसीदतु ॥ अनेन कर्मणा श्रीयज्ञपुरुषः प्रीयताम्॥ कायेनवाचामनसेन्द्रियैर्वा
बुद्ध्यात्मनावा प्रकृतिस्वभावात्। करोमियद्यत्सकलंपरस्मै नारायणायेतिसमर्पयामि ॥
इतिकर्मण ईश्वरार्पणंकृत्वा। न्त्याद्युत्सवंकारयित्वा। ब्राह्मणान्सन्तोष्य विसर्जयेत्॥
इतिशुभमस्तु ॥ ॥ ॥

४२१५

पुष्पमाहात्म्यम्

~~१६५~~

६०

श्रीगणेशाय नमः ॥ ॐ नमः श्रीभवान्यै ॥ ॥ पश्चिमाम्नायस्य पुष्पमाहात्म्यं ॥ जातीचपाटलीयूथीचम्पकैः श्वे
तउत्पलैः ॥ केतकीहेमजातीवकुञ्जरैः शतपत्रकैः ॥ १ ॥ वंधूकपद्मकुन्दाख्यैः शालिपुष्पैश्चपाटलैः ॥ कुसुम्भैः
किंशुकैः पुष्पैः पुन्नागनागकेशरैः ॥ २ ॥ वकुलैस्तगरैश्चान्यैर्दवकुंदाख्यसंभवैः ॥ काशमर्दोद्भवैर्दिवित्रैः
संध्यैः कणि[illegible]कैः ॥ ३ ॥ रक्तोत्पलैर्महापुष्पैर्यश्चान्यश्चारुगंधवान् ॥ भुक्तिमुक्तिप्रदाजातीवालोवलवि
वर्द्धनी ॥ ४ ॥ [illegible]तपालिकादेवि. वदन्तिचमहद्यशः ॥ शांतिपुष्टिकरंपद्मंशतपत्रंसुपत्रकं ॥ ५ ॥ वंधूकं
वश्यदंप्रोक्त[illegible]था रक्ताश्चमारके ॥ सौभाग्यंशालिपुष्पैश्चमुद्गरंसुखदायकं ॥ ६ ॥ कदम्बंवकुलंकुंदं
सुवर्कुंदोघनाशनं ॥ कुसुंभकिंशुकैदेवि. वश्यमाकृष्टिकारके ॥ ७ ॥ महालक्ष्मीप्रदौपुष्पौपुन्नागना
गकेशरौ ॥ रक्तमुत्पलकेवश्ये नीलसंचमारणे ॥ ८ ॥ त्रिसंध्यासंभवैः पुष्पैः शत्रूणांचभयावहं ॥ दः

रामः
१

222

मनंतुलसीमद्धेसर्व्वपापक्षयकरं॥ ८॥ सिंदूरीवश्यकृत्योक्तासदाकर्षणमानका॥ त्रिसंध्यासंभवैःपुष्पैः
क्रमेणाभ्यर्च्चयेत्सदा॥ १०॥ तस्यविघ्नोनजायेतसत्यमेतन्नसंशयः॥ अथइतरपुष्पकरणदेवीपूजनज
न्यपुण्यशतगुणवृद्धिकामःएभिर्ज्जातीपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥ १॥ अथभुक्तिमुक्तिफलप्रा
प्तिकामःएभिर्ज्जातीपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥ २॥ वालापुष्पस्य॥ वलविवर्द्धनप्राप्तिकामःए
भिर्व्वालापुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥ ३॥ श्वेतपाटलिपुष्पस्य॥ अथमहायशःप्राप्तिकामः
एभिःश्वेतपाटलिकापुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥ ४॥ पद्मपुष्पस्य॥ अथशांतिपुष्टिफलः
प्राप्तिकामःएभिःपद्मपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥ पद्मशतपत्रस्यतदेवफलं॥ ५॥ वंधूकपु
ष्पस्य॥ अथवश्यफलप्राप्तिकामःएभिर्व्वन्धूकपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥ ६॥ रक्तवंधूक

पुष्पस्य ॥ अद्यमारणफलप्राप्तिकामः एभिः रक्तवंधूकपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ७ ॥ शालिपु
ष्पस्य ॥ अद्यसौभाग्यफलप्राप्तिकाम एभिः शालिपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ८ ॥ मुद्गरपुष्पस्य ॥ अ
द्यसुखप्राप्तिकाम एभिर्मुद्गरपुष्पैः श्रीकुब्जिकादेवीमहं पूजयामि ॥ ९ ॥ शतपत्रपुष्पस्य ॥ अद्यशान्तिपु
ष्टिकारणकप्राप्तिकाम एभिः शतपत्रपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ १० ॥ कदम्बबकुलकुंदववः
स्य ॥ अद्याघनाशप्राप्तिकाम एभिः कदंबादिपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ११ ॥ कुसुंभकिंशुक
पुष्पस्य ॥ अद्यवश्यमाकृष्टिकारकप्राप्तिकाम एभिः कुसुंभकिंशुकपुष्पैः श्रीकुब्जिकादेवीमहं पूजयि
ष्ये ॥ १२ ॥ पुन्नागनागकेशरपुष्पस्य ॥ अद्यमहालक्ष्मीप्राप्तिकाम एभिः पुन्नागनागकेशरपुष्पैः श्रीः
कुब्जिकादेवीमहं पूजयिष्ये ॥ १३ ॥ रक्तोत्पलस्य ॥ अद्यवश्यफलप्राप्तिकाम एभी रक्तोत्पलपुष्पैः कु

रामः
२

223

ब्जिकादेवीमहं पूजयिष्ये ॥ १४ ॥ नीलह्लह्लोत्पलस्य ॥ अस्यमारणकामएस्मिन्नीलह्लह्लोत्पलपुष्पैः कु
ब्जिकादेवीमहं पूजयिष्ये ॥ १५ ॥ त्रिसंध्यापुष्पस्य ॥ अस्यशत्रुणांनयत्वकामएस्मिस्त्रिसंध्यापुष्पैः कुब्जि
कादेवीमहं पूजयिष्ये ॥ १६ ॥ दमनपुष्पस्य ॥ अस्यसर्वपापक्षयत्वकामएस्मिर्द्दमनपुष्पैः कुब्जिकादे
वीमहं पूजयिष्ये ॥ १७ ॥ तुलसीमंजरीपुष्पस्य ॥ अस्यसर्वपापक्षयत्वकामएस्मिस्तुलसीमंजरीपुष्पैः
कुब्जिकादेवीमहं पूजयिष्ये ॥ १८ ॥ सिंदूरीपुष्पस्य ॥ अस्यवश्याकर्षणकामएस्मिः सिंदूरीपुष्पैः कुब्जि
कादेवीमहं पूजयिष्ये ॥ १९ ॥ त्रिसंध्यापुष्पस्य ॥ अस्यसर्वविघ्ननिवारणकामएस्मिस्त्रिसंध्यापुष्पैः कुः
ब्जिकादेवीमहं पूजयिष्ये ॥ २० ॥ वकुलपुष्पस्य ॥ अस्याश्वनाशनफलप्राप्तिकामएस्मिर्वकुलपुष्पैः
कुब्जिकादेवीमहं पूजयिष्ये ॥ २१ ॥ कदम्वपुष्पस्य ॥ अस्यपापनाशफलप्राप्तिकामएस्मिः कदंवपु

ष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ २२ ॥ कुंदपुष्पस्य ॥ अद्य पापनाशफलप्राप्तिकामएभिः कुन्दपुष्पैः कुब्जि
कादेवीमहं पूजयिष्ये ॥ २३ ॥ अद्येतरपुष्पकरणादेवीपूजनजन्यपुण्यशतगुणवृद्धिकामएभिः कुंदपुः
ष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ २४ ॥ केतकीपुष्पस्य ॥ अद्य समृद्धिकामएभिः केतकीपुष्पैः कुब्जिकादेवी
महं पूजयिष्ये ॥ २५ ॥ करवीरमालापुष्पस्य ॥ अद्याग्निष्टोमयज्ञफलंप्राप्तिकाजन्यफलसमफलप्राप्ति
पूर्वकसूर्यलोकमहितत्वकामस्त्वाभिः करवीरपुष्पमालाभिः कुब्जिकादेवीमहं पूजयिष्ये ॥ २६ ॥ पद्म
मालापुष्पस्य ॥ अद्य ज्योतिष्टोमयज्ञजन्यफलसमफलप्राप्तिपूर्वकसूर्यलोकमहितत्वकामनया
ऽनयापद्ममालयाकुब्जिकादेवीमहं पूजयिष्ये ॥ २७ ॥ रहस्यकल्लोलिन्यां ॥ चंपकस्य ॥ अद्य स्वर्ण
वहुविधप्राप्तिकामएभिश्चम्पकपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ २८ ॥ नागकेशरस्य ॥ अद्य ह

पवनसुफलप्राप्तिकामएन्निर्व्वागकेशरपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥२९॥पुन्नागपुष्पस्य॥ः
अस्यज्वरशांतिप्राप्तिकामएन्निःपुन्नागपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥३०॥रूपकेशरपुष्पस्य॥अ
स्यशत्रुनाशप्राप्तिकामएन्निःकेशरपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥३१॥पारिजातपुष्पस्य॥अस्याः
पुष्टिकामएन्निःपारिजातपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥३२॥कुंदपुष्पस्य॥अस्यसर्व्वकामप्रा
प्तिकामएन्निःकुंदपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥३३॥जातीपुष्पस्य॥अस्यईश्वरीसंतोषप्राप्तिका
मएन्निर्ज्जातीपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥३४॥मालतीपुष्पस्य॥अस्येश्वरीसंतोषप्राप्तिकामए
न्निर्म्मालतीपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥३५॥कुब्जपुष्पस्य॥अस्यपरमेश्वरीसंतोषप्राप्तिकामए
न्निःकुब्जपुष्पैःकुब्जिकादेवीमहंपूजयिष्ये॥३६॥कोकिलाक्षपुष्पस्य॥अस्यअकालमृत्युनाशफलप्राप्ति

कामएभिः कोकिलाक्षपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ३७ ॥ द्रोणपुष्पस्य ॥ अद्यपरमेश्वरीसंतोषका
मनया छागादिबलिप्राप्तिकामएभिर्द्रोणपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ३८ ॥ करवीरपुष्पस्य ॥ अ
द्यसर्वाभीष्टफलप्राप्तिकामएभिः करवीरपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ३९ ॥ वंधूकपुष्पस्य ॥ अद्य
पदवस्त्रफलप्राप्तिकामएभिर्वंधूकपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ४० ॥ कमलपुष्पस्य ॥ अद्यवि
जयेयफलप्राप्तिकामएभिः कमलपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ४१ ॥ नीलोत्पलपुष्पस्य ॥ अद्यस
र्वकामफलप्राप्तिकामएभिर्नीलोत्पलपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ४२ ॥ कुमुदपुष्पस्य ॥ अ
द्यसर्वकामफलप्राप्तिकामएभिः कुमुदपुष्पैः कुब्जिकादेवीमहं पूजयिष्ये ॥ ४३ ॥ ॥ अथनिषिद्धानि
॥ विल्वपत्रैर्म्महाहानिः पुत्रशोककुलक्षयं ॥ मालतीं मृत्युदं भद्रे शोकसंतापकारकं ॥ उन्मत्तेन कुः

लोत्पातं सर्व्वरीव श्रियापहा ॥ मलिनं दुःखदं प्रोक्तं किमियुक्तं मरुद्भयं ॥ संकिता केश संयुक्ते वंधुहानिः
करोतितत ॥ तस्माद्देवि प्रयत्नेन शुभैः पुष्पैः प्रपूजयेत ॥ ॥ अथ उत्तराम्नायस्य ॥ हारावतंत्रे ॥ चंपकस्य ॥ अ
द्यद्भुतरपुण्यकरणाकदेवीपूजनजन्यपुण्यशतगुणवृद्धिकामएभिश्चंपकपुष्पैः श्रीगुह्यकालिकादेवी महं पूज
यिष्ये ॥ १ ॥ जवापुष्पस्य ॥ अद्यपट्टवस्त्रादिलाभब्रह्महत्यादिपापमुक्तिकामएभिर्ज्जवापुष्पैः श्रीगुह्यकालिका
देवीमहं पूजयिष्ये ॥ २ ॥ मालतीपुष्पस्य ॥ अद्यवागीशत्वप्राप्तिकामएभिर्म्मालतीपुष्पैः श्रीगुह्यकालिका० ॥
॥ ३ ॥ जातीपुष्पस्य ॥ अद्यमहीपालवशगाप्राप्तिकामएभिर्ज्जातीपुष्पैः श्रीगुह्य० ॥ ४ ॥ यूथिकापुष्पस्य ॥ अ
द्यमेधात्वफलप्राप्तिकामएभिर्यूथिकापुष्पैः श्रीगुह्य० ॥ ५ ॥ नागकेशरपुष्पस्य ॥ अद्यनृपत्वफलप्राप्तिका
मएभिर्न्नागकेशरपुष्पैः श्रीगुह्य० ॥ ६ ॥ चंपकपुष्प ॥ अद्यहेमलाभफलप्राप्तिकामएभिश्चंपकपुष्पैः श्रीगु०

॥७॥ माधवीपुष्पस्य ॥ अद्यमहीपालत्वफलप्राप्तिकामएभिर्म्माधवीपुष्पैः श्रीगु० ॥८॥ अतिमुक्तपुष्पस्य
अद्यबुद्धिवृद्धिफलप्राप्तिकामएभिरतिमुक्तपुष्पैः श्रीगुरु० ॥९॥ मल्लिकापुष्पस्य ॥ अद्यधनागमप्राप्तिका
मएभिर्म्मल्लिकापुष्पैः श्रीगु० ॥१०॥ कुंदपुष्पस्य ॥ अद्यकीर्त्तिफलप्राप्तिकामएभिःकुंदपुष्पैः श्रीगु० ॥११
॥ बंधूकपुष्पस्य ॥ अद्यबांधवप्रियफलप्राप्तिकामएभिर्बंधूकपुष्पैः श्रीगु० ॥१२॥ जवापुष्पस्य ॥ अद्य
शत्रुक्षयफलप्राप्तिकामएभिर्ज्जवापुष्पैः श्रीगु० ॥१३॥ पद्मपुष्पस्य ॥ अद्यआयुर्वृद्धिफलप्राप्तिकामए
भिःपद्मपुष्पैः श्रीगु० ॥१४॥ कुमुदपुष्पस्य ॥ अद्यकवित्वफलप्राप्तिकामएभिःकुमुदपुष्पैः श्रीगु० ॥१५
॥ कदम्बपुष्पस्य ॥ अद्यव्याधिनाशप्राप्तिकामएभिःकदम्बपुष्पैः श्रीगु० ॥१६॥ अम्लानपुष्पस्य ॥ अद्यवृ
द्धिवृद्धिफलप्राप्तिकामएभिरम्लानपुष्पैः श्रीगु० ॥१७॥ मरुवकपुष्पस्य ॥ अद्यजयफलप्राप्तिकामएः

रामः
५

226

निर्म्मलत्वकपुष्पैः श्रीगु० ॥ १८ ॥ कुरुण्टकपुष्पस्य ॥ अथ गजलाभफलप्राप्तिकामपन्निः कुरुण्टकपुष्पैः श्री
गु० ॥ १९ ॥ अपराजितापुष्पस्य ॥ अथ सर्व्वाङ्गसुन्दरफलप्राप्तिकामपन्निरपराजितापुष्पैः श्रीगु० ॥ २० ॥
सेफालिपुष्पस्य ॥ अथ पुत्रलाभप्राप्तिकामपन्निः सेफालिपुष्पैः श्रीगु० ॥ २१ ॥ अशोकपुष्पस्य ॥ अथ
शोकहानिफलप्राप्तिकामपन्निरशोकपुष्पैः श्रीगु० ॥ २२ ॥ वकुलपुष्पस्य ॥ अथ वरकुलमान्यफलप्राः
प्तिकामपन्निर्व्वकुलपुष्पैः श्रीगु० ॥ २३ ॥ दूर्व्वापुष्पस्य ॥ अथ धनधान्यादिफलप्राप्तिकामपन्निर्दूर्व्वा
पुष्पैः श्रीगु० ॥ २४ ॥ शाल्मलीपुष्पस्य ॥ अथ शत्रुक्षयप्राप्तिकामपन्निः शाल्मलीपुष्पैः श्रीगु० ॥ २५
द्रोणपुष्पस्य ॥ अथान्नलाभफलप्राप्तिकामपन्निर्द्रोणपुष्पैः श्रीगु० ॥ २६ ॥ वकपुष्पस्य ॥ अथ जराः
गमनाशफलप्राप्तिकामपन्निर्व्वकपुष्पैः श्रीगु० ॥ २७ ॥ पुन्नागपुष्पस्य ॥ अथ राज्यलाभफलप्राप्ति
कामपन्निः पुन्नागपुष्पैः श्रीगु० ॥ २८ ॥ कर्णिकारपुष्पस्य ॥ अथ वरुन्नतिफलप्राप्तिकामपन्निः कर्णि

कारपुष्पैः श्रीगु० ॥२९॥ पाटलपुष्पस्य ॥ श्वश्यदीर्घायुत्वफलप्राप्तिकामपश्मिः पाटलपुष्पैः श्रीगु० ॥ ३०
॥ तगरपुष्पस्य ॥ श्वश्यमान्यताफलप्राप्तिकामपश्मिस्तगरपुष्पैः श्रीगु० ॥३१॥ पालाशपुष्पस्य ॥ श्वश्यगे
जाधिकरणफलप्राप्तिकामपश्मिः पलाशपुष्पैः श्रीगु ॥ ३२॥ शिरीषपुष्पस्य ॥ श्वश्यप्रमदाप्तीफलः
प्राप्तिकामपश्मिः शिरीषपुष्पैः श्रीगु० ॥३३॥ जयंतीपुष्पस्य ॥ श्वश्यश्रियफलप्राप्तिकामपश्मिर्जयंती
पुष्पैः श्रीगु० ॥३४॥ विल्वपत्रस्य ॥ श्वश्यपरां गतिंफलप्राप्तिकामपश्मिर्विल्वपत्रैः श्रीगु० ॥३५॥ ॥ सिद्ध
लस्यार्चनेनदेवफलं ॥ ॥ उत्तराम्नायस्य ॥ महाकालसंहितायां ॥ शिरीषैः कर्णिकारैश्च चम्पकैः
कोविदारकैः ॥ वकुलैश्च वमन्दारैः कुन्दपुष्पैः कुरुण्टकैः ॥ लताभिर्वल्लवृक्षस्य मृदु दूर्वांकुरैरपि ॥
कांचनारैरशोकैश्च पुन्नागकेतकीदलैः ॥ सेफालिकाभिर्यूथीभिर्ज्जातीभिर्द्दमनैरपि ॥ शतवर्गैः
र्मल्लिकाभिरम्लानैर्बंधुजीवकैः ॥ झिंटीभिश्च जवापुष्पैः करवीरैश्च किंशुकैः ॥ पारिजातैः पाटलैः

रामः
६
227

अपरैर्नीलोत्पलैरपि ॥ माधवीभिर्म्मल्लकैरपराजितयापि ॥ अन्यैः शस्तकदम्बैश्च द्रोणपुष्पैः सु-
केशरैः ॥ अर्च्चयेत्कुसुमैरेतैर्द्देवीं साधकसत्तमः ॥ ॥ तथा ॥ विल्वपत्रैर्यथा प्रीतिकरं देव्या वरानने ॥
न तथान्यानि विदन्ति पुष्पेषु प्रीतिकारकं ॥ अतो यत्नेन्दातव्यं विल्वपत्रं त्रिपत्रयुक् ॥ ॥ अथ नै-
मित्तिके ॥ ॥ तथा ॥ प्रावृष्ययवकल्लानां हि वैशाखे मासि कारयेत् ॥ नागकेशराणां ज्येष्ठे आधिक्यमा-
चरेत् ॥ आषाढे तु प्रकर्त्तव्यः करवीरस्य संचयः ॥ चम्पकोत्पलपद्मानां स्तूयतत्वं नभसीष्यते ॥ वा-
कुल्यलोध्रपुष्पस्य मासि भाद्रपदे चरेत् ॥ आयिस्थाविधातव्या वंधूकस्याश्विने तथा ॥ अगस्त्यकुसुमा-
नां हि आरिना कार्त्तिके चरेत् ॥ आधिक्यं विल्वपत्राणां मार्गशीर्षे सदा चरेत् ॥ पौषेडवोकुराणां हि सं-
दोहोतिफलप्रदः ॥ कुन्दस्तोमो माघमासे सर्व्वकल्याणकारकः ॥ फाल्गुणे माधवीपुष्पं सर्व्वसिद्धिवि-
धायकं ॥ चैत्रेऽशोकस्य कलिका कलिकालविनाशिनी ॥ मालती यूथिका चैव दमनं कर्णिकारकं

॥कमलंकेतकंकुन्दवकमल्लानपाटलातथा॥नवमालिकाकर्णपुष्पंतथावैवातिमुक्तकः॥एकादशेतानि
सदाकुसुमानिवरानने॥देयानिजगदंबायैनैरन्तैर्मित्रिकार्च्चने॥ ॥अथनैमित्रिकेवैशाषकृत्यं
अथवैशाखेमासिएभिर्वकुलपुष्पैःश्रीगुह्यकालिकादेवीमर्च्चयिष्ये॥१॥ज्येष्ठे॥अथज्येष्ठेमासिए
भिर्न्नागकेशरपुष्पैःश्रीगु०॥२॥आषाढे॥अथआषाढेमासिएभिःकरवीरपुष्पैःश्रीगु०॥३॥श्रावणे॥
अथश्रावणेमासिएभिश्चम्पकपुष्पैःश्रीगु०॥४॥पद्मउत्पलपुष्पस्यतदेवफलं भाद्रपदे॥अथभा
द्रपदेमासिएभिर्ल्लोध्रपुष्पैःश्रीगु०॥५॥आश्विने॥अथआश्विनेमासिएभिर्बन्धूकपुष्पैःश्रीगु०॥६॥का
र्त्तिके॥अथकार्त्तिकमासिएभिरगस्तिपुष्पैःश्रीगु०॥७॥मार्गशिरे॥अथमार्गशिरेमासिएभिर्बिल्वप
त्रैःश्रीगु०॥८॥पौषे॥अथपौषेमासिस्वस्तिफलंप्राप्तिकामएभिर्दूर्वाङ्कुरैःश्रीगु०॥९॥माघे॥अथमाः
घेमासिसर्वकल्याणफलप्राप्तिकामएभिःकुन्दपुष्पैःश्रीगु०॥१०॥फाल्गुने॥अथफाल्गुनेमासिसः

रामः
७

228

र्वसिद्धिफलप्राप्तिकामएभिर्माधवीपुष्पैःश्रीगु०॥११॥चैत्रे॥अथचैत्रेमासिकलिकालविनाशिनीफ
लप्राप्तिकामएभिरशोकपुष्पैःश्रीगु०॥१२॥ ॥अथमासवचूडामणौ॥दत्तेचैवजवापुष्पे.पदवत्सफ
लंलभेत॥ब्रह्महत्यादिकंपापंक्षणान्नश्यतिनिश्चितं॥अपरायास्तुमाहात्म्यंमयावक्तुंनशक्यते
॥श्वेतायाद्विगुणंपुण्यं.दद्यात्कृत्वापराजितां॥ ॥तथा॥अपराक्कन्दम्बेनतुकुलस्थानांमनोहरं॥
ह्यारिक्तकुसुमंदेवेत्स्वयमत्तिसदाशिवः॥तन्मध्येरघुमादायपुष्पमध्येतुवन्दनं॥रक्तकुंकुमरा
गंवा.कृत्वातत्रशिवात्मकं॥योजयेद्धिवशक्त्यास्तु.ऐकांसंभावयन्प्रिया॥क्षणंविचिंत्यतत्रैवसं
चिन्त्यपरमेश्वरी॥जपान्तदेतत्कुणोन्यांद्भवंपरमदुर्लभं॥अमृतादधिकंज्ञेयमेतद्द्रव्यंतुसाधकैः
॥ ॥अथकाम्यः॥तथाचोक्तंहारातन्त्रे॥मालतीकुसुमैर्देवि.वागीशत्वप्रदायिका॥वशगास्तुर्म्मदी
पाला.जातीपुष्पैर्न्नरेशाशयः॥मेधाःस्फूर्यूथिकाभिस्तु.नृपत्वंनागकेशरैः॥माधवीभिर्म्मदीपाल

हेमलाभश्च चम्पकैः ॥ श्रुतिपुष्पैर्बुद्धिवृद्धिर्मल्लिकाभिर्धनागमः ॥ कुन्दैः कीर्त्तिमवाप्नोति वन्धूकैर्द्राञ्चवप्रि
यः ॥ जवापुष्पेन रिपवः संक्षयान्ति तत्क्षणात् ॥ पद्मैराज्यमवाप्नोति कुमुदैः कविता भवेत् ॥ कदम्बैर्व्या
धिनाशः स्याद्दमनेर्बुद्धिमान्भवेत् ॥ जयप्राप्तिर्म्मरुवकैर्गजलाभः कुरण्टकैः ॥ तथापराजितापुष्पैः
र्म्भवेत्सर्व्वाङ्गसुन्दरः ॥ शेफालिकाप्रसूनेन पुत्रलाभः प्रदृश्यते ॥ शोकहानिरशोकेन वकुलैः कुलमा
न्यता ॥ दूर्व्वया धनधान्यानि शाल्मल्या शत्रुतः क्षयाः ॥ द्रोणपुष्पेन नानलाभो वकपुष्पैर्ज्ञनागमः ॥ रा
ज्यलाभश्च पुन्नागैः कर्णिकारैर्व्वहून्नतिः ॥ दीर्घायुत्वं पटोलेन नगरैः सर्व्वमान्यता ॥ पलाशकुसुमैर्द्दि
वि वहुगोजाविकारका ॥ शिरीषपुष्पैः प्रमदा जयन्त्यावजयंश्रियः ॥ करवीरैर्म्मन्त्रसिद्धिर्व्विल्वपत्रैः
परांगतिं ॥ सात्विक्यां कामनायां तु शितपुष्पं प्रशस्यते ॥ उच्चाटने वशीकारे प्रीतये वैरिणाक्षये ॥ गं
धपुष्पविशेषेण कर्त्तव्यं लोहितं सदा ॥ मोहने कामिनीलाभे पीतमेवोभयं मतं ॥ कृत्वाभिचारद्वेषेव

रामः
८

229

मारणेवासितंद्वयं ॥ ॥ अथनिषिद्धानि ॥ महाकालसंहितायां ॥ तुलसीत्रिरपामार्गैर्द्धत्तूरैःसिंदु
वारकैः ॥ अर्कपत्रैश्चाशकैश्च नैवदेवींप्रपूजयेत् ॥ देवीमित्यसितेर्थस्तत्वकरणेकृत्वात् ॥ सिद्धलक्ष्म
[illegible]त[illegible]वफलं ॥ ॥ अथदक्षिणाकाल्याः ॥ कालीतंत्रे ॥ नानाप्रकारवलिभिर्नानापुष्पैर्मनोरमैः ॥ अ
पामार्गदलैर्भृङ्गैस्तुलसीवर्जितैःशुभैः ॥ पूजनीयासदामन्त्या नृणांशीघ्रफलाप्तये ॥ ॥ तथा ॥ सुगं
धैःश्वेतलोहितैःकुसुमैरर्चयेत्कुलैः ॥ विल्वमरुवकाद्यैश्च तुलसीवर्जितैःशुभैः ॥ द्रोणपुष्पैर्विशे
षेणवज्रपुष्पेणमिश्रितैः ॥ ॥ मुंडमालातंत्रे ॥ पुष्पान्यपितथादद्याद्द्रव्यहंसासितानिच ॥ श्वेतपु
ष्पंजवापुष्पं करवीरंतथाप्रिये ॥ तगरंमालतीजाती सेवन्तीयूथिकातथा ॥ धत्तूराशोकवकुल
श्वेताकृष्णापराजिता ॥ वकपुष्पंविल्वपत्रं चंपकंनागकेशरं ॥ मल्लिकाकिंटिकाकांवीरक्तंयत्नारकौ
न्तिं ॥ अर्कपुष्पंकोकनदं वर्वरंचप्रियंसदा ॥ अष्टम्यांचविशेषेणतुष्टाभवतिकालिका ॥ पद्म

पुष्पेणारक्तेनसंतुष्टासर्व्वदेवता ॥ कृष्णावाथदिवाशुक्लाकालिकावरदाभवेत् ॥ स्मशानधत्तूरेणैव
तुष्टाधूमावतीपरा ॥ वन्यपुष्पैस्तुविविधैस्तुष्टाभवतिसर्व्वदा ॥ आमलक्याफलपत्रेणतुष्टाभवतिपा
र्व्वती ॥ ॥ शक्तियामले ॥ सावित्रीवनवानीच.दुर्गादेवीसरस्वती ॥ योर्च्चयेत्तुलसीपत्रैःसर्व्वकामसु
सिद्ध्यति ॥ ॥ अथनीलसरस्वत्याः ॥ तथाचोक्तंनीलतंत्रे ॥ अष्टम्यांवचतुर्द्दश्यांपूजयेद्वययाविधि
॥ आज्ञासिद्धिमवाप्नोति.जवापुष्पंचपार्व्वती ॥ चंदनंचार्क्ककुसुमंदद्याच्छ्वेतापराजिता ॥ बंधूकः
मालयातुष्येत्तथाछागप्रदानवत् ॥ अर्घंदद्यात्प्रयत्नेननित्यपूजासुसर्व्वदा ॥ ॥ मत्स्यसूक्ते ॥ पुष्पंश्वे
तंरक्तकोकंबंधूकंशतपत्रकं ॥ वर्ह्वशाद्वितयंचैवकर्णिकारद्वयंतथा ॥ वकमन्दारधुत्तानि.करवीरा
णिशस्यते ॥ संधिकाद्वितयंजातीक्षौमपुष्पजयंतिका ॥ विल्वपत्रंकुरवकंमुनिपुष्पंचकेशरं ॥ वा
सन्तीद्वितयंचैवकाशपुष्पमरूवकं ॥ दमनंचलवंगंच.यूथीमेकल्लिकातथा ॥ सुगंधिश्वेतलोहि

नाम:
२

230

त्यैः कुसुमैरर्च्चयेत्कुलैः ॥ कुलैरिति पुरयुग्मं ॥ ॥ अथ निषिद्धानि ॥ त्रिशक्तिरत्ने ॥ तुलसी मालती व
र्ज्यं पुष्पं दद्यात्प्रसन्नधीः ॥ ॥ कुलचूडामणावपि ॥ वर्ज्जयेन्मालतीपुष्पं वर्जयेत्तुलसीदलं ॥ ॥
अथोर्ध्वाम्नाये ॥ वामकेश्वरतंत्रे ॥ मंदारपारिजातं च वश्यसौभाग्यदायकं ॥ पीतजाती सर्व्वकालं वि
शेषतस्तग्रनेहितं ॥ खर्जूरपुष्पजातीच कुंदः श्रीवृद्धिदायकं ॥ वंधूकं मोहसौभाग्यं जवा च त्रिपुराप्रि
या ॥ उत्पलं धनवृद्धिं च पद्मं पौष्टिकमेव च ॥ पुन्नागं सर्व्वसंपत्तिं चक्रकं धनहानिकं ॥ कह्लारोह्लाः
सद्वृद्धिं च केतकी च विवर्जयेत् ॥ सुकृत्स्नतिः फलं ज्ञेयं मल्लिका दुःखदायिका ॥ चम्पकैः पुत्रकामः
स्तु त्रिसंध्या दुःखमोचका ॥ द्रोणमोक्षमवाप्नोति सेवन्ती सर्व्वसिद्धिदा ॥ सेफालिका जयकरी क
र्णिका वृद्धिदायका ॥ कुमुदं प्रीतिदं चैव सुदर्शनेधनप्रदं ॥ कुरुण्टसिद्धिसौभाग्यं नीलद्रव्यं तु दा
निकं ॥ दमनं सर्व्वसंपत्तिं बिल्वपत्रं पराप्रियं ॥ निर्गंधोत्कटगंधं च वर्ज्जयेच्चक्रपूजने ॥ कुसुमापराजि

ता मृत्युः सुतमालीनशैवच || मल्लिकानामसंज्ञाया ऽडुःखदा मृत्युदासदा || सिंदिप्यादिविप्रदा वैवकेशयु
क्रस्रदानिकं || किमिसुक्तमहाप्रीति राजद्वारे मकद्रयं || इत्येतत्पुष्पमाहात्म्यं ज्ञात्वा श्रीत्रिपुरां यजे
त् || ||अथ वश्यसौभाग्यकामणस्मिर्मंदारपारिजातपुष्पैः श्रीत्रिपुरसुंदरी देवीमहं पूजयिष्ये || १
|| अथसंतंमनफलप्राप्तिकामणस्मिः पीतमंदारपारिजातपुष्पैः श्रीत्रि० || २ || अथ श्रीवृद्धिफलप्राप्तिकाम
णस्मिः खर्ज्जूरपुष्पैः श्रीत्रि० || ३ || जातिपुष्पस्य || अथ श्रीवृद्धिफलप्राप्तिकामणस्मिः कुंदपुष्पैः श्रीत्रि
|| ४ || वंधूकपुष्पस्य || अथमोक्षफलप्राप्तिकामणस्मिर्वंधूकपुष्पैः श्रीत्रि० || ५ || जवापुष्पस्य || अथ
त्रिपुरायाः प्रियफलप्राप्तिकामणस्मिर्जवापुष्पैः श्रीत्रि० || ६ || उत्पलस्य || अथ धनवृद्धिफलप्राप्ति
कामणस्मिरुत्पलपुष्पैः श्रीत्रि० || ७ || पद्मपुष्पस्य || अथ पौष्टिकफलप्राप्तिकामणस्मिः पद्मपुष्पैः श्री
त्रिपुरसुंदरी० || ८ || वक्रुपुष्पं निषिद्धं || कल्हारपुष्पस्य || अथ ग्रामवृद्धिफलप्राप्तिकामणस्मिः कह्ल

रामः
१०

231

रपुष्पैः श्रीत्रि० ॥ ८ ॥ केतकीपुष्पं निषिद्धं ॥ ॥ कुरुपुष्पं निषिद्धं ॥ ॥ चंपकपुष्पस्य ॥ स्वपुत्रफलप्राप्ति
कामएम्निश्चंपकपुष्पैः श्रीत्रि० ॥ ९ ॥ त्रिसंध्यापुष्पस्य ॥ स्वयदुःखमोचनकामएम्निस्त्रिसंध्यापुष्पैः श्रीत्रि
॥ १० ॥ द्रोणपुष्पस्य ॥ स्वयमोक्षप्राप्तिकामएम्निर्द्रोणपुष्पैः श्रीत्रि० ॥ ११ ॥ सेफालिपुष्पस्य ॥ स्वयजयप्रा
प्तिकामएम्निः सेफालिपुष्पैः श्रीत्रि० ॥ १२ ॥ कर्णिकारपुष्पस्य ॥ स्वयवृद्धिफलप्राप्तिकामएम्निः कर्णि
कारपुष्पैः श्रीत्रि० ॥ १३ ॥ कुमुदपुष्पस्य ॥ स्वयप्रीतिफलप्राप्तिकामएम्निः कुमुदपुष्पैः श्रीत्रि० ॥ १४ ॥ः
सुदर्शनपुष्पस्य ॥ स्वयधनवृद्धिकामएम्निः सुदर्शनपुष्पैः श्रीत्रि० ॥ १५ ॥ कुरुण्टकपुष्पस्य ॥ स्वयसि
द्धिसौभाग्यफलप्राप्तिकामःएम्निः कुरुण्टकपुष्पैः श्रीत्रि० ॥ १६ ॥ नीलद्रवापुष्पं निषिद्धं ॥ ॥ विल्वपत्र
स्य ॥ स्वयपरमप्रियकामएम्निर्विल्वपत्रैः श्रीत्रि० ॥ १७ ॥ निर्गंधोत्कटगंधंपुष्पं वर्ज्जयेत् ॥ ॥ रक्ताप
राजितापुष्पं मृत्युफलं ॥ ॥ मूतमालतीपुष्पं मृत्युफलं ॥ ॥ किणिपुष्पं व्याधिफलं ॥ ॥ केशयुक्तफः

लंफलंनिष्फलं ॥ ॥ किमिसुक्लपुष्पंमहाभीतिरामदडंव ॥ ॥ज्ञानार्णवे ॥ जवापुष्पैर्महेशानि पूर्ववत्पूजनः
ये[illegible]वां ॥ मासमात्रेण हन्त्येव पातकं शतजन्मकं सौभाग्यवान्भवेन्मंत्री त्रिपुरायाः प्रसादतः ॥ श्वेतपु
ष्पैर्महेशानि मह्लड्रिः पूजयेन्नरः ॥ नाशयेत्पातकं सर्वं मासमात्रं प्रपूजयेत् ॥ त्रिलोकवशगं तस्य सर्वैः
पापंदहेद्ध्रुवः ॥ विल्वपत्रैश्च जलजैः मत्तैश्च परिपूजयेत् ॥ पूर्ववत्परमेशानि मासमात्रं प्रसन्नधीः
समृद्धिमान्भवेन्मंत्री सर्वपापं हरेत्सदा ॥ मल्लीकामालतीजातीकुन्दैश्च शतपत्रकैः ॥ श्वेतोत्पलसुः
शीतैश्च पूजयन्मासमात्रकं ॥ कुलाचारक्रमेणैव पातकं शतजन्मकं ॥ ब्रह्महत्यादिजनितं नाशये
न्नात्र संशयः ॥ मुक्तिं तस्य करे देवी. वाचा जीवसमो भवेत् ॥ अगस्त्यद्रोणवन्धूक. जवारक्तोत्पलैः प्रिये
॥ पूर्वक्रमेण संपूज्य मासमेकं प्रसन्नधीः ॥ पातकं नाशयेन्मंत्री साक्षात्कामसमो भवेत् ॥ चम्पकैः
पाटलैर्दैविवकुलैर्नागकेशरैः ॥ वकुलैः सिंदुवारैश्च. पूजयेत्पूर्ववत्क्रमात् ॥ सौभाग्यमतुलं ततः

राम:
११

232

स्यमासमात्रेणाजायते ॥ पापंविनाशयेद्देवि यदिजन्मसहस्रकं ॥ ॥अथनिषिद्धं॥ ॥तत्रैव॥
पुष्पैःपर्युषितैर्द्देवि नार्च्चयेत्स्वर्णकैरपि ॥ निर्म्माल्यभूतैःकुसुमैरुच्छिष्टैःपरमेश्वरि ॥ ॥वाराहीतंत्रे॥ प
लाशकाशकुसुमैर्न्नार्च्चयेद्दूरतस्त्यजेत् ॥ धातृतमालजैःपत्रैस्तुलसीद्वितीयेस्तथा ॥ पूजनात्पातकी
वेत्स्यादिन्द्रस्यापिहरेच्छ्रियं ॥ त्रिपुरापूजनेवर्ज्यातुलसीसर्व्वदाबुधैः ॥ तुलसीघ्राणमात्रेणक्रुद्धाभव
तिसुन्दरी ॥ ॥कौलालवीये॥ भैरवीसुन्दरीतारा ब्रह्मविष्णुविवस्वतां ॥ तुलसीवर्ज्जितापूजा सापूजा
विफलाविफलाभवेत् ॥ अत्रभैरवीसुंदरीताराप्रसंगेब्रह्मविष्णुविवस्वतांपूजातुलसीवर्ज्जितासवि
फलासफलेत्यर्थः ॥ नतुकेवलब्रह्मविष्ण्वादिपूजने ॥ तंत्रसारकारस्वरसोऽप्येवं ॥ तुलसीनिषेधस्तुः
दिव्यवीरमिति ॥ ॥ताराभक्तिसुधार्णवे ॥ तद्भिन्नं ॥ दिव्यवीरयोरेवनिषिद्धप्रतिपादकवचनाभा
वात् ॥ ॥अथपुष्परहस्यं॥ रहस्यकल्लोलिन्यां ॥ ॥अतःपुष्पस्यमाहात्म्यंलेशमात्रंवदाम्यहं ॥ यंत्रा

त्वा साधकः सिद्धिं लभेन्नूनं न संशयः॥ चम्पकस्य प्रदानेन स्वर्णं वहुविधं लभेत्॥ नागकेशरदानेन रूपवान्
सुभगो भवेत्॥ पुन्नागपुष्पदानेन ज्वरशांतिर्भवेत्सदा॥ केशरस्य प्रदानेन शत्रुर्न्नाशयते ध्रुवं॥ पारि-
जातपारिभद्रदानेनायुः प्रवर्द्धते॥ कुंदपुष्पप्रदानेन काममाप्नोति वै ध्रुवं॥ जातीमालतीकुञ्जैश्च शीघ्रं
तुष्यति मातरः॥ कोकिलाख्येप्रदेयेन स्त्रकालमरणं हरेत्॥ ओड्रपुष्पप्रदानेन तुष्यते परमेश्वरी॥ यथा
छागादिवलिना तथा तुष्यति निश्चितं॥ करवीरेण पुष्पेण पूजयेज्जगदीश्वरीं॥ प्रतिपुष्पेषु मंत्रेण यो जपि-
त्वा निशासु वै॥ लभते वांछितान्कामान्नाशासिद्धिं च लभ्यते॥ लोहितो वाथ रक्तो वा करवीरस्तु सिद्धिदः॥
वंधूकस्य प्रदानेन पट्टवस्त्रं च लभ्यते॥ अपराजितामाहात्म्यं नैव शक्यं व्रवीम्यहं॥ अपराजितया अन्या
प्रिया देव्या न विद्यते॥ अपराजितायाः पुरास्थिता पूर्वघातं समा॥ योनिरूपं तु सा स्थित्वा ततस्त्वनिर्गतीः
शिवा॥ करवीरो लिंगरूपः शिवो जगति वै सदा॥ शिवशक्त्याश्च संयोगात्करवीरापराजिता॥ रक्तचंदन

रामः
१२

233

मिश्रेणातयोर्योगेनपूजयेत्॥ तुष्यतेपरमेशानिसापूजासफलास्मृता॥ पुष्पैरारण्यसंभूतैःपत्रैर्वागिरिसंभवैः॥ स्वारामोद्भवपुष्पैर्वात्रिसंध्यंश्वेतलोहितैः॥ श्वेतपत्रैःकुब्जिकैर्वापूजयेद्वांछितप्रदं॥ अपर्युषितनिश्छिद्रैःप्रक्षालितैर्जन्तुवर्जितैः॥ स्वात्मारामोद्भवैर्वापिपुष्पैःसंपूजयेच्छिवां॥ कमलैःसितशोणैश्चवाजपेयफलंलभेत्॥ बिल्वपत्रेणसंपूज्यमण्डलेश्वरतांलभेत्॥ नीलोत्पलैःसर्वकामान्कुमुदैःकामदोभवेत्॥ पत्रेष्वपिचपुष्पेषुपलाशंश्रेष्ठमुच्यते॥ अशोकेशोकहरणोदेव्याःप्रीतिकरःपरः॥ नमस्कृत्यजपेन्मंत्रंलक्षणात्सिद्धिदायकं॥ येकलौसिद्धिदावत्सतान्ववक्ष्येशृणुतत्वतः॥ बहूनांबहुनोक्तेनसर्वंशक्तिषुयत्कृतं॥ तान्यवक्ष्येसमासेन.विष्णुलोकेषुदुर्लभं॥ विनाशक्तिंनशक्तिःस्यान्नोवाशक्तिःप्रसीदति॥ तस्माद्भक्त्यान्वितोशक्तेःपूजांकुर्याद्विचक्षणः॥ सर्वेयन्विषयैःपुष्पैस्तत्क्षणान्नन्मयोभवेत्॥ अहिंसापरमंपुष्पंपुष्पमिंद्रियनिग्रहं॥ दयापुष्पंधर्मपुष्पं.ज्ञानपुष्पंचपंचमं॥ कस्तूरीकुंकुमंचैवकर्पूरंकमलंकुलं॥ काका

शपंचकं सैवदेवताप्रीतिकारकं ॥ ॥इति रहस्यकल्लोलिन्यां पुष्परहस्यं ॥ ॥चम्पकपुष्पस्य ॥ अस्य सर्वैश्व
र्यप्राप्तिकामएभिश्चम्पकपुष्पैः श्रीत्रिपुरसुंदरीदेवीमहं पूजयिष्ये ॥१॥नागकेशरपुष्पस्य ॥ अस्य रूपवत्कुम
फलप्राप्तिकामएभिर्न्नागकेशरपुष्पैः श्रीत्रि० ॥२॥पुन्नागपुष्पस्य ॥ अस्य ज्वरशांतिप्राप्तिकामएभिः पुन्ना
गपुष्पैः श्रीत्रि० ॥३॥केशरपुष्पस्य ॥ अस्य शत्रुनाशप्राप्तिकामएभिः केशरपुष्पैः श्रीत्रि० ॥४॥पारिजात
पुष्पस्य ॥ अस्यायुर्वृद्धिकामएभिः पारिजातपुष्पैः श्रीत्रि० ॥५॥पारिभद्रपुष्पस्य ॥ अस्यायुर्वृद्धिप्राप्तिः
कामएभिः पारिभद्रपुष्पैः श्रीत्रिपु० ॥६॥कुंदपुष्पस्य ॥ अस्य सर्व्वकामफलप्राप्तिकामएभिः कुंदपुष्पैः श्री
त्रि० ॥७॥जातिपुष्पस्य ॥ अस्येश्वरीसंतोषप्राप्तिकामएभिर्ज्जातिपुष्पैः श्रीत्रि० ॥८॥मालतीनिषिद्धं ॥ ॥
॥कुब्जपुष्पस्य ॥ अस्य देवीसंतोषप्राप्तिकामएभिः कुब्जपुष्पैः श्रीत्रि० ॥९॥कोकिलाक्षपुष्पस्य ॥ अस्या
कालमृत्युनाशफलप्राप्तिकामएभिः कोकिलाक्षपुष्पैः श्रीत्रि० ॥१०॥द्रोणपुष्पस्य ॥ अस्य परमेश्वरीः

संतोषकामनया छागादिबलिफलप्राप्तिकामएभिर्द्रोणपुष्पैः श्रीत्रि० ॥११॥ करवीरपुष्पस्य ॥ अस्य सर्वाऽ
भीष्टफलप्राप्तिकामएभिः करवीरपुष्पैः श्रीत्रि० ॥१२॥ बंधूकपुष्पस्य ॥ अस्य पट्टवस्त्रफलप्राप्तिकामए
भिर्बंधूकपुष्पैः श्रीत्रि० ॥१३॥ कमलपुष्पस्य ॥ अस्य वाजपेयफलप्राप्तिकामएभिः कमलपुष्पैः श्रीत्रि० ॥१४
॥ नीलोत्पलस्य ॥ अस्य सर्वकामफलप्राप्तिकामएभिर्नीलोत्पलपुष्पैः श्रीत्रि० ॥१५॥ कुमुदपुष्पस्य ॥ अ
स्य सर्वकामफलप्राप्तिकामएभिः कुमुदपुष्पैः श्रीत्रि० ॥१६॥ ॥ इति रहस्य कल्लोलिन्यां पुष्पमाहात्म्यं स
माप्तं ॥ ॥ अथ सामान्यतः पुष्पमाहात्म्यं ॥ कामदं कामदं नत्वा नीत्वा मतिमतां मतं ॥ पुष्पचिंतामणिं कु
र्वे वांछितार्थनिकेतनं ॥१॥ शिवरहस्ये ॥ पुष्पैर्देवाः प्रसीदन्ति पुष्पे देवाश्च संस्थिताः ॥ किंचातिबहुः
नोक्तेन पुष्पस्योन्नतिमतं द्विकौ ॥२॥ परं याति पुष्पगतं पुष्पेनैव प्रसीदति ॥ त्रिवर्गसाधनं पुष्पं पु
ष्टिश्रीस्वर्गमोक्षदं ॥३॥ पुष्पमूले वसेद् ब्रह्मा पुष्पमध्ये च केशवः ॥ पुष्पाग्रे च महादेव सर्वे देवस्थि

तादत्ते ॥ ४ ॥ ॥ अथ सामान्यतः पुष्पविवरणं ॥ शिवपुराणे ॥ देवानां शुक्लपुष्पं तु दुर्गंधं दानवास्तथा ॥ क
र्कशं लोहितं चैव राक्षसानां प्रकीर्त्तितां ॥ उद्धृतं वाप्यवल्लायां पुष्पं स्पन्नो न पुष्पितं ॥ तत्पुष्पं तु पितृणां स्याः
त्तत्वं देवि ब्रवीम्यहं ॥ ६ ॥ ॥ अथ सामान्यतः पुष्पदानफलं ॥ श्रीविष्णुपुराणे ॥ तपःशीलगुणोपेते पात्रे वे
दस्य पारगे ॥ दशदत्वा सुवर्णानि यत्फलं कुसुमेषु तत् ॥ ७ ॥ शिवधर्म्मसंग्रहे ॥ दशसौवर्णिकं पुष्पं निर्गं
धियद्विमामिति ॥ शतसाहस्रिकामाला. अनन्तं लिंगपुराणे ॥ ८ ॥ निर्गंधं कुसुमस्यापि. विधिः ख्यातो द्विजो
त्तमाः ॥ शोभनैर्दिव्यगंधाढ्यैः अयुतेन तु यत्फलं ॥ ९ ॥ एकपुष्पप्रदानेन लिंगेषु प्रतिमासु वा ॥ ज्ञेयं पुष्पा
न्तरं ज्ञेयं यथा स्यात्तन्निबोधमे ॥ १० ॥ अर्क्कपुष्पसहस्रेभ्यो बकपुष्पं विशिष्यते ॥ बकपुष्पसहस्रेभ्य ए:
कधुत्तूरकं परं ॥ ११ ॥ धुत्तूरकसहस्रेभ्यो बृहत्पुष्पं विशिष्यते ॥ बृहत्पुष्पसहस्रेभ्यो द्रोणपुष्पं विशिष्य
ते ॥ १३ ॥ द्रोणपुष्पसहस्रेभ्यो ह्यपामार्गो विशिष्यते ॥ अपामार्गसहस्रेभ्यः कुशपुष्पं विशिष्यते ॥ १४ ॥

कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ॥ शमीपुष्पसहस्रेभ्यः श्रीमन्नीलोत्पलं परं ॥ १५ ॥ सर्व्वेषामेव पुष्पाणां वलं वै नीलमुत्पलं ॥ नीलोत्पलसहस्रेण यो मालां संप्रयच्छति ॥ १६ ॥ शिवाय विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ १७ ॥ वसेच्छिवपुरे नित्यं शिवतुल्यपराक्रमः ॥ शेषाणां पुष्पजातीनां यत्फलं परिकीर्त्तितं ॥ १८ ॥ सतत्फलानुसारेण शिवलोके महीयते ॥ शमीपुष्पबृहत्याव. कुसुमं तुल्यमुच्यते ॥ १९ ॥ करवीरसमा ज्ञेया जाती विजयपाटलाः ॥ श्वेतमंदारकुसुमं सितपद्मेन तत्समं ॥ नागचम्पकपुन्नागा मुद्गरकसमाः स्मृताः ॥ २० ॥ ॥ शिवधर्म्मसंग्रहे ॥ नास्ति पापसमः शत्रुर्न्न च धर्म्मसमः सुखी ॥ नैव रुद्रात्परो देवो न दुःखं कनकादपि ॥ २१ ॥ शिवधर्म्मे ॥ तथा ॥ मालाभिर्व्वा सुगंधाभिर्यो लिंगं पूजयेन्नरः ॥ स वेदिकां विशेषेण सोऽनन्तफलमश्नुते ॥ २२ ॥ विल्वपत्रैरखंडैश्च सकृल्लिंगं प्रपूजयेत् ॥ सर्व्वपापविनिर्म्मुक्तः शिव

लोके महीयते ॥ २३ ॥ कुस्तुरकैश्च यो लिंगं सकृत्पूजयते नरः ॥ स गोलक्षफलं प्राप्य लभते परमं पदं ॥ २४ ॥
बृहतीकुसुमैर्मत्या, यो लिंगं सकृदर्चयेत् ॥ गवामयुतदानस्य, फलं प्राप्य शिवं व्रजेत् ॥ २५ ॥ मल्लिकोत्पल
पद्मानि जातीपुन्नागचम्पकं ॥ अशोकशोतमन्दारकर्णिकारवकानि च ॥ २६ ॥ करवीरार्कमन्दारश
मीतगरकेशरः ॥ कुशापामार्गकुमुदकदम्बद्रोणजैरपि ॥ २७ ॥ पुष्पैरेतैर्यथालाभं यो नरः पूजयेच्छिवं
॥ स यत्पुण्यमवाप्नोति तदेकाग्रमनाः शृणु ॥ २८ ॥ सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामकैः ॥ पुष्पमा
लाकुलैर्दिव्यैर्गीतवादित्रनिःस्वनैः ॥ २९ ॥ तं द्वैर्म्मवी रवादेश्च तत्कन्दं गगनालये ॥ रुद्रकन्यासमाकी
र्णैर्देवदानवदुर्लभैः ॥ ३० ॥ उह्यमानस्त्वमरैः स्तूयमानः सुरासुरैः ॥ स गच्छति पुरं दिव्यं, यत्र वा तवितं
भवेत् ॥ ३१ ॥ यैस्तु वा पीतकुसुमैर्ज्जलस्थलजैः शिवं ॥ संपूज्य प्रेक्षितैर्भक्त्या शिवलोके महीयते ॥ ३
२ ॥ शिवस्योपरि यः कुर्यात्सुघनं पुष्पमंडपं ॥ शोभितं पुष्पस्रग्दामैरापीठान्तं प्रलम्बिभिः ॥ ३३ ॥ अनपाश्च

रामः
१५
236

यैर्म्मरूपापानैर्द्दिव्यपुष्पोपशोभितैः ॥ सर्व्वैःपरिवितैःश्रीमानास्तेशिवपुरेसुखी ॥ ३४ ॥ अनेककालसंख्य
ङ्कंयःशिवेकुसुमंशिवं ॥ कुर्वीतपर्व्वकालेषुविचित्रंकुसुमोज्वलं ॥ ३५ ॥ सपुष्पकविमानेनसहस्रपरि
तारितः ॥ दिव्यस्त्रीसुखसंभोगक्रीडारतिसमन्वितः ॥ ३६ ॥ अक्षयंमोदतेकालमतिरस्कृतशासनः ॥ शिवा
दिसर्व्वलोकेषुयत्रेष्टंतत्रयातिसः ॥ ३७ ॥ ॥ शिवधर्म्मसंग्रहे ॥ सकृद्दत्तेषुदेदेवि गोसहस्रफलंलभेत
॥ पक्षेणायोगीभवतिमासेनतुदिवंव्रजेत् ॥ ३८ ॥ मासद्वयेनवाप्नोतिकात्स्नांफलमुत्तमं ॥ त्रिभिर्म्मासैः
प्रपद्येतब्रह्मलोकमनुत्तमं ॥ ३९ ॥ चतुर्भिःसिद्धिमाप्नोतियोगसिद्धिंचपंचभिः ॥ षण्मासेननरोयातिरुद्र
लोकेनसंशयः ॥ ४० ॥ तद्वाकृतिधरोभूत्वा चंद्रार्द्धकृतशेखरः ॥ प्रयातिहर्षयानेनद्वितीयइवशूल
धृक् ॥ ४१ ॥ ॥ अथशिवेविहितपत्राणि ॥ लिंगपुराणे ॥ विल्वपत्रंशमीपत्रंभृंगराजस्यपत्रकं ॥
अटरूषस्यपत्राणिपत्रंशिशुकवालकं ॥ १ ॥ तमालस्यचपत्रंच देवपत्रिकसंभवं ॥ उन्मत्तश्वेतकम

सपत्रं बकमल्लस्य च ॥ २ ॥ गंगापत्रकपत्रं च पत्रं कल्हारकस्य च ॥ जलकण्णारिकापत्रं पत्रं यत्र मरूवकं ॥
३ ॥ शतपत्रं सदा प्रोक्तं गंधालं वृकपत्रकं ॥ पत्रं दुन्दुरिकायाश्च ग्रामशिष्याश्च पत्रकं ॥ ४ ॥ द्रोणापामा
र्गपत्रं च पत्रं च खदिरस्य च ॥ येषां पत्रैः शिवे पूजा तेषां पुष्पैश्च सर्व्वदा ॥ ५ ॥ रसालकिंशुकाशोककडुर्व्वी
याश्च पुराणकैः ॥ साङ्गलैश्च सदा पूजा, अनावेन सदा शिवे ॥ ६ ॥ ॥ अथ पुष्पदानप्रकारः ॥ ज्ञानमालायां ॥
पत्रं वा यदि वा पुष्पं फलं नष्टमधोमुखं ॥ दुःखदं तत्समाख्यातं यथोत्पन्नं निवेदयेत् ॥ १ ॥ तथा ॥ अधोमु
खार्पणे नष्टं तु पुष्पांजलिविधौ न तत् ॥ अंजलिदाने ऽधोमुखतानदोषायेत्यर्थः ॥ ॥ अथ कालाः ॥ शिवधर्म्मे
॥ कनकानि कदम्बानि, रात्रौ देयानि शंकरे ॥ दिवा शेषाणि पुष्पाणि अर्द्धरात्रौ च मल्लिका ॥ १ ॥ प्रहरंति
ष्ठते जाती करवीरमहर्निशं ॥ रात्रौ देयानि द्रोणनीयानीति सागरः ॥ रात्रौ देयानि पूजयानि, इत्याचारचि
न्तामणिकारः ॥ ॥ अथ काम्यो ॥ शिवधर्म्मसंग्रहे ॥ नंदिकेश्वर उवाच ॥ अकामोऽभ्यर्च्चितं लिंगमेतदुक्तंफ

रामः
१८

237

लं मया ॥ कामनास्यर्च्चमानस्तु भूषणेन तस्यापि यत्फलं ॥ १ ॥ बकेन वरदो देवः करवीरैर्द्धनप्रदः ॥ अर्केण
श्रियमाप्नोति मोक्षं धुत्तूरकेण तु ॥ २ ॥ नीलोत्पलैर्भवेद्भोगो. योऽर्च्चयेत्त्रिदशोत्तमं ॥ रक्ताब्जैः प्राप्नुयाद्रा
ज्यं पुण्डरीकैश्च वज्रिणं ॥ ३ ॥ चम्पकैः सर्व्वकामानि. पुन्नागैर्न्नागकेशरैः ॥ ईप्सितांल्लभते कामांस्तथा केशरः
दामकैः ॥ ४ ॥ मंत्रसिद्धिमवाप्नोति योऽर्च्चयेद्गन्धपुष्पकैः ॥ योऽर्च्चयेत्परमेशानं सितार्क्केण तथैव च ॥ ५
॥ सर्व्वान्कामानवाप्नोति योर्च्चयेद्गन्धपुष्पकैः ॥ कुङ्कुमैर्विपुलो लाभः सौभाग्याय च वारुणी ॥ ६ ॥ कन्याकाम
स्तु जातीभिर्योऽर्च्चयेत्परमेश्वरं ॥ लभते चोत्तमां कन्यां षण्मासेन न संशयः ॥ ७ ॥ मल्लिकाज्ञानकर्म्मार्थमर्च्च
यन्तं महेश्वरं ॥ लभते परमं ज्ञानं संसारभयनाशनं ॥ ८ ॥ पुत्रकामाय कुन्दैश्च. अर्च्चयीत शुचिर्न्नरः ॥ ल
भते बहुपुत्रत्वं धनवन्तं चिरायुषं ॥ ९ ॥ आरोग्यं कुलपुष्पैस्तु अशोकैः प्रियसङ्गमं ॥ कर्णिकारैर्द्धनं
विद्या वश्यार्थे द्रोणपुष्पिकं ॥ १० ॥ कदम्बेनार्च्चयेल्लिङ्गं. सततं नियतव्रतः ॥ शत्रूणां वशकामाय नित्यमेव

प्रदीपयेत॥ ११॥नश्यन्तिव्याधयस्तस्य,योर्च्चयेदतिमुक्तकैः॥सिंधुवारस्यपुष्पेणवन्धोमुच्येतबंधनात्॥१२॥अ
कणसितवर्णानिनिर्गन्धकुसुमानिच॥तानिशम्भुविनायाशायदेवदेवायकल्पयेत॥१३॥पीतकानितुः
पुत्रार्थेपुष्पाणिविजयायच॥नित्यमेवतुयोदद्यात्सनत्कामनवाप्नुयात्॥१४॥जलजानितुपुष्पाणिव
स्यार्थेतुप्रकल्पयेत॥नीलरक्तानियान्येवतानिवश्यकराणितु॥१५॥सर्व्वकामप्रदंविल्वंदरिद्रस्यवि
मोचन॥विल्वपत्रात्परंनास्ति,येनतुष्यतिशंकरः॥१६॥विजयार्थेदमनकंयोजयेन्नियमस्थितः॥
विजिताःशत्रवस्तेनयोर्च्चयेद्वृषभध्वजं॥१७॥सुखंमरुवकेनैवजम्बूटःसर्व्वकामदः॥तिलकोधनका
माय.गोकामायचवकुली॥१८॥सौष्यदस्तापितगरः किंकिराष्टकामदः॥आरोग्यंवधनंचैवफल
नीकामदास्मृता॥१९॥शालःप्रियकरंचैवकिंशुकादायुराप्नुयात्॥हस्ताश्वपशुकामायकुब्जेनार्च्च
येच्छिवं॥२०॥कर्पूरदमनंदद्याच्छत्रूणांचविनाशने॥नश्यन्तिशत्रवःशीघ्रं,देवदेवस्यपूजनात्॥

रामः
१२
238

॥२१॥ श्यामावारोग्यदा नित्यं. जवापुष्पं तथैव च॥ कुरुण्ठकस्य वश्यार्थे. नित्यं लिंगप्रपूजनात्॥२२
॥विद्वेषे यूथिका योज्या. देवदेवं महेश्वरे॥ केतकी शत्रुनाशाय यज्ञुश्चा लिङ्गन्तु योर्च्चयेत्॥२३॥ सर्व
कामप्रदा हृत्या. व्याघ्री देवी प्रकीर्त्तिता॥ ज्योत्स्नाकरी तथैवेह. नित्यमेव तु कामदा॥२४॥ वासकेनार्च्चये
द्धेवं बलमायुश्च वर्द्धते॥ झिण्ठिकासुखदा नित्यं. तथा चासरवम्पकं॥२५॥ डिम्रिकं व्याधिनाशार्थः
मम्बकाणां तथैव च॥ जयन्तीजयकामाय श्वेता च गिरिकर्णिका॥२६॥ विद्वेषोच्चाटनार्थाय. निम्बपु
ष्पेन चार्च्चयेत्॥ माण्डीवाकर्णाणो योज्या मदन्तीवजयो भवेत्॥२७॥ अपि पुष्पी रुद्रजटा हन्ति सर्वा
नुपद्रवान्॥ सनपुष्पं च यत्प्रोक्तं कोकिलाक्ष्यं तथैव च॥२८॥ सर्व्वं सुक्तं तु शान्त्यर्थे सर्व्वं पीतन्तु पौ
ष्टिके॥ ह्लले वै चाभिचारे च. देवदेवाय कल्पयेत्॥२९॥ पत्रं पुष्पं फलं तोयं. तृणाश्चैव तथासुने॥
प्रत्यहं शास्त्रवेदज्ञान्ता सोड्गतिमाप्नुयात्॥३०॥ ॥अथ निषिद्धानि॥ केतकी चातिमुक्तं च कुन्दः

यूथीमदन्तिका ॥ शिरीषसर्ज्जवंधूकं कुसुमानि विवर्ज्जयेत् ॥ १ ॥ वाकुचीपत्रकुसुमं करजेन्द्रसमुद्भवं ॥
वैमीतिकानि पुष्पाणि पत्राणि च विवर्ज्जयेत् ॥ २ ॥ कार्त्तिकमाहात्म्ये ॥ जवाकुन्दशिरीषैश्च यूथिकाः
मालतीतथा ॥ केतकीभवपुष्पैश्च नैवार्च्यः शंकरः सदा ॥ ३ ॥ सदेति नित्यपूजायामित्यर्थः ॥ काम्येनिषि
द्धानामपि विधानश्रवणात् ॥ कुंदं तु वर्षव्यापी शिवपूजायां माघेमासि विहितमित्याचारचिन्तामणिः
॥ ॥ लिंगपुराणे ॥ सर्ज्जवंधूकपुष्पाणि केन्दा यूथीमदन्तिका ॥ केतकीजातिपुष्पं च श्वेतां वै चापराजि
ता ॥ ४ ॥ शोषिता रक्ता श्वेता च तथा मणिकपुष्पकैः ॥ स्वर्णात्तु गर्भाचार्य्यश्चैवैन्नेति कुसुमेन च ॥ ५ ॥ पूज
यित्वा तथा पुष्पैरेभिश्चैव नरः सदा ॥ स्ववीचि नरके पापः पचेद्देवं न संशयः ॥ ६ ॥ कपित्थं केतकीपुष्पं
मां— रीकापुपाटल ॥ निम्बपुष्पं करञ्जञ्च धातकीपुष्पमेव च ॥ ७ ॥ शिरीषतुञ्जलापुष्पमगस्तुकं च
वर्ज्जयेत् ॥ किंतु परामन्त्रानामिह विहितविचारो नास्ति ॥ पातञ्जले पुष्पाध्याये ॥ सुमं वाप्यसुमं वापि

रामः
१८

२३९

फलपुष्पसमन्वितं ॥ भक्त्या निवेदयेत्सर्व्वं नाशुभं किंचिदाप्नुयात् ॥ ९ ॥ अन्यत्रापि ॥ सर्व्वपुष्पैः सदापू
जा विहिता विहितैरपि कर्त्तव्या सर्व्वदेवानां भक्तियोगोत्र कारणं ॥ १० ॥ यानि कण्ठककीर्णानि यानि चोपह
तानि च ॥ रात्रिपर्य्युषितानीह दूरतः परिवर्ज्जयेत् ॥ ११ ॥ अथोपहतानि ॥ गोतमीये ॥ आसनगतमव
नीगतमन्तर्ज्जलधौत पुष्पगन्धमाघ्रातं वा यच्चत्रोटितमभिवादनकर्मकान्तुकारस्तीनं सर्व्वमिदं सर्व्वेषां देवा
नामप्रियकुसुमम् ॥ ॥ पुष्पमालायां ॥ अन्तर्ज्जलक्षालितमासनस्थं स्वयंविसीर्णं भुविसंविलीनं ॥
एतानि पुष्पाणि समस्त देवपूजाविधौ वापरकर्म्मकानि ॥ १२ ॥ हारीतः ॥ स्नानं कृत्वा तु ये केचि पुष्पं चिन्व
न्तिये द्विजाः ॥ देवतास्तन्न गृह्णन्ति भस्मीभवति काष्ठवत् ॥ १३ ॥ उग्रगंधमगंधं च क्रयक्रीतं च निष्फलं ॥ देव
परिहृतं स्नानं नार्प्पयेत्तु कदाचन ॥ १४ ॥ मलिनं भूमिसंस्पृष्टं कृमिकेशादिदूषितं ॥ पर्य्युषितानि पुष्पाणि
वर्ज्जयेद्देवतार्च्चने ॥ १५ ॥ मुकुलैर्नार्च्चयेद्देवं तथा क्लिष्टैस्तु खण्डितैः ॥ स्वयं विकासितैः पुष्पैः स्वयं च पति

तैर्दुर्वि ॥ १६ ॥ वासोभिः संवृतैर्न्नीलैः श्वाऽस्पृष्टैस्तथैव च ॥ त्रिपत्राश्चनकुसुमैर्न्नार्च्चयेत्तु कदाचन ॥ १७ ॥ त्रिप
त्रेनयत्तन्नासुपुष्पपरं ॥ स्वयंप्रकाशितैरिति कृत्रिमविकाशितैः ॥ श्वऽस्पृष्टैरिति पादादिस्पृष्टैरित्यर्थः ॥ ॥
सर्वपुष्पविशेषाणां म्लूगताद्दिदोषाजावमाद्ध ॥ ॥ गौतमीये ॥ म्लूगतं वर्ज्जयेत्पुष्पं सेफालिवकुलं विना
॥ कलिकाभिस्तथात्याज्यो विनाचम्पकपद्मकैः ॥ १ ॥ विल्वस्य खदिरस्यैव तथा धात्रीदलस्य च ॥ तमालस्य
च पत्रस्य छिन्नभिन्नं न दुष्यति ॥ २ ॥ तुलस्यागस्त्यविल्वानां नास्तिपर्युषितामता ॥ वर्ज्ज्यं पर्युषितं पुष्पं व
र्ज्ज्यं पर्युषितं जलं ॥ ३ ॥ न वर्ज्ज्यं जाह्नवीतोयमवर्ज्ज्यं तुलसीदलं ॥ तुलसी सर्वदा शुद्धा तथा विल्वदलानि
च ॥ ४ ॥ सद्यद्देति पञ्चदिनपर्य्यन्तमित्यर्थः ॥ पञ्चदिनानन्तरं पर्य्युषितम्भवति ॥ ॥ तथा ॥ जलजानां च
पुष्पाणां विल्वपत्रस्य चैव हि ॥ एषां पर्य्युषिताशंका कार्य्या पञ्चदिनोर्द्धतः ॥ ५ ॥ वकपुष्पं तु सप्तरात्रान्तः
न्तरं निर्माल्यतापत्तिः ॥ ॥ शिवधर्म्मसंग्रहे ॥ सप्तरात्रं निवेद्यस्तु वकोस्तद्गायधीमता ॥ दिने दिने तु दात

रामः
१२

240

वंशोधयित्वापुनःपुनः ॥ ६ ॥ सप्तरात्रमतिक्रम्यनिर्म्माल्लत्वंप्रपद्यते ॥ ॥ हारीतः ॥ तिष्ठेद्दिनत्रयंशुष्कंः
पद्मामलकंतथा ॥ दिनैकंकरवीराणियोग्यानिवततपोधन ॥ ७ ॥ पर्य्युषितेष्वपिमाला.कारस्यदेषनः
दोषकृत्इतिशैवागमे ॥ ॥ इतिश्रीश्रीप्रतापमल्लन्नृपालितेमायासिंहकृतौपुष्पचिन्तामणौप्रथमःप्रका
शः ॥ १ ॥ ॥ अथविष्णोः ॥ नरसिंहपुराणे ॥ तपःशीलगुणोपेते.पात्रेवेदस्यपारगे ॥ दत्वादशसुवर्णाः
नियत्फलंलभतेनरः ॥ १ ॥ तत्फलंलभतेमर्त्यो.हरेःकुसुमदानतः ॥ मल्लिकामालतीजातीकेतकीलोध्रच
म्पकैः ॥ २ ॥ पुन्नागनागबकुलैःपद्मैरुत्पलजातिभिः ॥ एतैरन्यैश्चकुसुमैःप्रशस्तैरर्च्चतंनर ॥ ३ ॥ स्वर्वयद्द
शास्त्वर्ण्णस्य.प्रत्येकंफलमाप्नुयात ॥ एकेनकरवीरेणसितेनाप्यसितेनवा ॥ ४ ॥ हरिंवाहरमभ्यर्च्यनृप
नत्तनयोम्नवेत ॥ ॥ विष्णुपुराणे ॥ मालतीमल्लिकाचैवयूथिकाचातिमुक्तकः ॥ ५ ॥ पाटलाकरवीरंच
जयापावन्तिरेवच ॥ कुब्जकस्तगरश्चैवकर्णिकारःकुरुंठका ॥ ६ ॥ चम्पकोवातकःकुन्दोवाणोवर्वरमल्लि

का॥ अशोकस्तिलकः शोस्य तथा वैवाटरूषकाः॥ ७॥ शमीपुष्पप्रकारास्तु शुक्लाः केशवपूजने॥ तथा॥ वः
मान्यम्बुसमुत्थानि रक्तनीलेन तथोत्पले॥ ८॥ सितोत्पलं व कृष्णस्य दयितानि सदा नृप॥ तानि पुष्पाणि देयानिः
विष्णवे प्रभविष्णवे॥ ९॥ ॥ अथ पुष्पविशेषाणां फलानि॥ नरसिंहपुराणे॥ द्रोणपुष्पे तथैकस्मिन्माधवाय
निवेदिते॥ दत्वा दशसुवर्णानां यत्फलं तदवाप्नुयात्॥ १०॥ एवं पुष्पविशेषेणा फलं तदधिकं नृप॥ ज्ञेयं पु
ष्पान्तरस्यापि यथास्यान्तं निबोध मे॥ ११॥ द्रोणपुष्पसहस्रेभ्यः खादिरं तु विशिष्यते॥ खादिरेभ्यः सहस्रेभ्यः
शमीपुष्पं विशिष्यते॥ १२॥ शमीपुष्पसहस्रेभ्यो बिल्वपत्रं विशिष्यते॥ बिल्वपत्रसहस्रेभ्यो बकपुष्पं वि
शिष्यते॥ १३॥ बकपुष्पसहस्राद्धि नंद्यावर्त्तं विशिष्यते॥ नंद्यावर्त्तसहस्राद्धि करवीरं विशिष्यते॥ १४॥ कर
वीरसहस्राद्धि चम्पकं तु विशिष्यते॥ चम्पकस्य केस्यपुष्पशतादशोकं पुष्पमुत्तमं॥ १५॥ अशोकपुष्पसह
स्रात्सेवन्तीपुष्पमुत्तमं॥ सेवन्तीपुष्पसहस्रात्कुब्जकं पुष्पमुत्तमं॥ १६॥ कुब्जकस्य सहस्राद्धि मालतीपुष्पः

रामः
२०
241

मुत्तमं॥ मालतीपुष्पसहस्रात्त्रिसंध्यापुष्पमुत्तमं॥१७॥ त्रिसंध्यारक्तसहस्रा.त्रिसंध्याश्वेतमुत्तमं॥ त्रिसंध्याश्वेतसहस्रा.त्कुंदपुष्पंविशिष्यते॥१८॥ कुंदपुष्पेसहस्राद्धि शतपत्रंविशिष्यते॥ शतपत्रसहस्राद्धि मल्लिकापुष्पमुत्तमम्॥१९॥ मल्लिकापुष्पसहस्रा.ज्जातीपुष्पंविशिष्यते॥ सर्व्वासांपुष्पजातीनांजातीपुष्पमिहोत्तमं॥२०॥ जातीपुष्पसहस्रेण.यच्छेन्मालांसुशोभनां॥ विष्णवेविधिवद्भक्त्या.तस्यपुण्यफलंशृणु॥२१॥ कल्पकोटिसहस्राणि.कल्पकोटिशतानिच॥ वसेद्विष्णुपुरेधीमान्विष्णुतुल्यपराक्रम॥२२॥ शेषाणांपुष्पजातीनांयत्फलंविधिदेशितं॥ तत्फलस्यानुसारेणविष्णुलोकेमहीयते॥२३॥ पत्राण्यपि चपुण्यानिहरिप्रीतिकराणिच॥ प्रवक्ष्यामिनृपश्रेष्ठशृणुष्वगदतोममः॥२४॥ अपामार्गपत्रपुष्पे.तस्माद्भृंगरजस्यच॥ तस्माच्चखादिरंश्रेष्ठं.तस्माच्चशमिपत्रकं॥२५॥ दूर्वापत्रंततःश्रेष्ठं.ततोपिकुशपत्रकं॥ तस्माद्दमनकंश्रेष्ठं.ततोविल्वस्यपत्रकं॥२६॥ विल्वपत्रादपिहरे.स्तुलसीपत्रमुत्तमं॥ एतेषांतु

सकालक्षैः पत्रैश्चैवार्चयेद्धरिं ॥२७॥ सर्वपापविनिर्मुक्तो. विष्णुलोके महीयते ॥ ॥गौतमीये॥ कमलेकरवीरे
डे. तुलस्यो जातिकेतके ॥२८॥ नागकेशरयावन्ती. कल्हारं चम्पकोत्पले ॥ नंद्यावर्त्तं च यूथी च मल्लिकाः
नवमल्लिका ॥२९॥ कुंदमंदारकं चैव सौगंधिकं च केशरं ॥ कुरणशोकसर्ज्जानि विल्वं वसुनिपुष्पकं ॥
३०॥ तमालपत्रकं चैव. कर्णिकारं पलाशकं ॥ एतान्यन्यानि पुष्पाणि यथालाभं निवेदये ॥३१॥ सुरभीः
निच सर्वाणि स्थलजान्यम्बुजानि च ॥ एतानि पुष्पदेयानि विष्णवे प्रभविष्णवे ॥३२॥ ॥वामनपुराणे॥ वः
लिं प्रतिपक्षादवाकं ॥ तान्येव च प्रशस्तानि कुसुमानि महासुर ॥ यानिस्युर्व्वर्णयुक्तानि रसगंधयुतानि च ॥
३३॥ जातीसुताह्वासुमनः कुंदवाकपुटस्तथा ॥ वाणं च चम्पकोशोकं करवीरं च यूथिका ॥३४॥ पारिः
भद्रं पाटला च बकुलं गिरिशालिनी ॥ कनकं जंतु वनजं पीतकं तगरेत्यपि ॥३५॥ एतानि हि प्रशस्तानि
कुसुमान्यच्युतार्च्चने ॥ स्कंदोक्तं वैष्णवामृते ॥ मालतीतुलसीपद्मकेतकीसु निपुष्पकं ॥ येऽर्च्चयंति जगन्ना

पाम:
२१

242

थैतेगकृतिहरेःपदं ॥ त्रिंशद्वर्षसहस्राणित्रिंशद्वर्षशतानिच ॥ ३७ ॥ प्रीतोभवतिदैत्यारिःकदंवकुसु
मार्च्चितः ॥ यथापद्मालयाप्राप्य.प्रीतोभवतिमाधवः ॥ ३८ ॥ कदंवकुसुमंदृष्ट्वातथाप्रीणातिकेशवः ॥ स
हस्रकदंवपुष्पाणांहेलयाहरिरर्च्चितः ॥ ३९ ॥ सप्तजन्मनिदेवर्षेतस्यलक्ष्मीर्नदूरगा ॥ कदम्बपुष्पानि
करंयःकरोतिशिरोपरि ॥ ४० ॥ केशवस्यमहाप्राज्ञोगोसहस्रफलंलभेत् ॥ - ॥ तथा ॥ मालतीमालया
विष्णुपूजितोयेनकार्त्तिके ॥ ४१ ॥ कपिलाशतदानस्यलभतेफलमुत्तमं ॥ मल्लिकाकुसुमैर्देवं.वसन्ते
गरुडध्वजं ॥ ४२ ॥ योर्च्चयेत्परयाभक्त्या.दहेत्पापंत्रिधार्जितं ॥ दमनेनापिदेवेशंसंप्राप्येमधुमाध
वे ॥ ४३ ॥ कपिलाशतदानस्य.स्वर्च्चनाल्लभतेफलं ॥ केतकीपत्रएकेन.पूजितोगरुडध्वजः ॥ ४४ ॥ स
माःसहस्रंसुप्रीतो.भवतेमधुसूदनः ॥ मुनिपुष्पकृतांमालांयेऽर्च्चयन्तिजनार्द्दनं ॥ ४५ ॥ देवेन्द्रोपिमु
निश्रेष्ठकरोतिकरसंपुटं ॥ यःपुनःपाटलापुष्पैर्व्वैसंतेगरुडध्वजं ॥ ४६ ॥ अर्च्चयेत्परयाभक्त्यामुक्तियो

गीमवेद्धिमः॥ वकुलाशोककुसुमैः येर्च्चयन्तिजगत्पतिं॥४७॥ विशोकान्तेमविष्यतियावच्चन्द्रदिवाकरौः
॥ येर्च्चयन्तिजलाद्यसंकरवीरैःसिताशितैः॥४८॥ वहुर्त्तुमानिविप्रेंद्रविप्रोभवतिमानवः॥ मंजर्य्या
सहकारस्यकेशवोपरिमर्द्दिदा॥ ४९॥ येर्च्चयन्तिमहामागा गोकोटिफलभागिनः॥ दुर्व्वांकुरैर्हरेः
र्यस्तुपूजाकालेप्रयछति॥ ५०॥ पूजाफलंशतगुणांसम्यगाप्नोतिमानवः॥ शमीपत्रैस्तुयोदेवं पूज
यत्यसुरेश्वरं॥५१॥ यममार्गंमहाघोरंनिस्तीर्णेतेननारद॥ वर्षाकालेतुदेवेशं कुसुमैस्त्रमयकोद्भवैः
॥५२॥ येर्च्चयन्तिनतेमर्त्याःसंसारेनपुनर्भवाः॥ कुम्रीवुष्पेणदेवर्षेयेर्च्चयन्तिजनार्द्दनं॥५३॥ सुव
र्णपलमात्रस्यलभतेतत्फलंमुने॥ सुवर्णकेतकीपुष्पैर्येर्च्चयन्तिजनार्द्दनं॥५४॥ कोटिजन्मार्ज्जितं
पापंदहतेगरुडध्वजः॥ कुंकुमारुणपद्मान्यांगंधाढ्यांशतपत्रिका॥ ५५॥ योददातिजगन्नाथेस्त्वे
तद्वीपेवसेच्चिरं॥ इत्तास्यद्वातयाख्याता कीर्त्तितानमितास्तुते॥५६॥ रोपितासिंचितानित्यं पूजिताः

रामः
२२
243

तुलसीस्तुन्ना ॥ रोपिता तुलसी यावत्कुरुते मूलविस्तरं ॥ ५७ ॥ तावद्युगसहस्राणि ततोन सुकृतं छने ॥
रोपिता तुलसी पुंभिर्वर्द्धते वसुधातले ॥ ५८ ॥ कुले तेषां तु ये जाता ये भविष्यन्ति ये गताः ॥ कल्पायुत
शतं सार्द्धं ते वसन्ति हरेर्गृहे ॥ ५९ ॥ ॥ अथ निषिद्धानि ॥ गोतमीये ॥ न रक्तचंदनं यातु,ऽत्तीयाद्र
क्तपुष्पकं ॥ विल्वपत्रैस्तत्यसूनैर्न्नार्च्चयेद्देवकीसुतं ॥ ६० ॥ शुक्लैस्तु नार्च्चयेद्विष्णुं पुष्पैः पत्रैः फलैरपि ॥
स्नात्वानीतैः पर्युषितैर्याचितैः क्रमवर्षिकैः ॥ ६१ ॥ रक्तपुष्पैरित्यनुक्ते रक्तपुष्पपरं — अन्यथा
रक्तकरवीरनिषेधायत्तैः ॥ विल्वपत्रैरिति गोपालमूर्त्तिपरं ॥ देवकीसुतमिति विशेषश्रवणात् ॥ ॥
॥ विष्णुपूजायां ॥ नरसिंहपुराणे ॥ विल्वपत्राग्निधानाद्य ॥ वामनपुराणे ॥ पुरन्नीनि तथान्यानि वर्ज्जयि
त्वा तु केतकीं ॥ केतकीनिषेधो नरसिंहे ॥ विहाय तिलत्वाकरः ॥ निषिद्धविहितमित्याचारचिन्ता
मणिकारः ॥ वस्तुतस्तु केतकीनिषेधोऽस्यैव ॥ तथा चोक्तं पुष्पमालायां ॥ मंदारमर्कधुत्तूरं शाल्म

लीकास्तु नारजं ॥ निषिद्धं विष्णुपूजायां पुष्पं वैत्नीतकं तथा ॥ नरसिंहस्य पूजायां निषिद्धं केतकीद्वयं ॥ ० ॥
॥ कार्त्तिकमाहात्म्ये ॥ शिरीषोन्ननागिरिज मल्लिकाशाल्मलीभवैः ॥ अर्कजैः कर्णिकारैश्च विष्णुर्नार्च्यस्तथा
क्षतैः ॥ ६३ ॥ अथ सूर्यस्य ॥ भविष्यपुराणे ॥ दशदत्वा सुवर्णानां निष्काणां लभते फलं ॥ करवीरन्तु ऐ
कस्मिन्नर्काय विनिवेदयेत् ॥ १ ॥ लभते तत्फलं वीर यथाहम्भगवान्रविः ॥ भक्त्या पूजयते योर्कमर्कपुष्पैः
समाहितः ॥ २ ॥ तेजसा सोर्कसंकाशो ह्यर्केणासह मोदते ॥ जवापुष्पसहस्रेभ्यः पद्ममेकं विशिष्यते ॥ ३
॥ वीरपद्मसहस्रेभ्यो वकपुष्पं विशिष्यते ॥ वकपुष्पसहस्रेभ्यः कुशपुष्पं विशिष्यते ॥ ४ ॥ कुशपुष्पः
सहस्रेभ्यः शमीपुष्पं विशिष्यते ॥ शमीपुष्पसहस्रेभ्यः प्रशस्तं नीलमुत्पलं ॥ ५ ॥ नीलोत्पलसहस्रेण नी
लोत्पलशतेन च ॥ रक्तैश्च करवीरैश्च यस्तु पूजयते रविं ॥ ६ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च
॥ वसेदर्कपुरे श्रीमानर्कतुल्यपराक्रमः ॥ ७ ॥ केशकीटविपन्नानि यजेद्रुपहतानि च ॥ मुकुलैर्न्नार्च्चये

ज्ञात्तुमपक्वंचनिवेदयेत् ॥ ८ ॥ अलाभेपुष्पजातीनांपत्राण्यपिनिवेदयेत् ॥ पत्राणामप्यलाभेतुनन्त्याम
वतिपूजितं ॥ ९ ॥ ॥ तथा ॥ मल्लिकामालतीचैवकुर्वीशोकातिमुक्तकः ॥ पाटलाकरवीरंचजयापावन्तिरे
वच ॥ १० ॥ कुब्जकस्तगरंचैवकर्णिकारस्तुरुण्टकः ॥ चंपकोचारकःकुंदोबाणोवर्वरमल्लिका ॥ ११ ॥ अशो
कस्तिलकास्तिलकोलोध्रस्तथाचैवाटरूषकः ॥ शतपत्राणिवान्यानिवकुलस्यविशेषतः ॥ १२ ॥ अगस्त्यः
किंशुकंतद्वत्पूजायांभास्करस्यच ॥ विल्वपत्रंशमीपत्रंपत्रंभृंगरजस्यच ॥ १३ ॥ तमालपत्रंचदराःसदैव
तपनप्रियः ॥ तुलसीकालेतुलसीतथारक्तंचचंदनं ॥ १४ ॥ केतकीपत्रपुष्पंचसद्यस्तुष्टिकरंरवेः ॥ ये
षांनप्रतिषेधोस्तिगंधवर्णान्वितानिच ॥ १५ ॥ तानिपुष्पाणिमन्त्याचमानवेलोकमानवे ॥ ॥ पुष्पमाः
लायां ॥ जातीकुन्दशमीकुशेशयकुशाशोकंवककिंशुकंपुन्नागंकरवीरचम्पकजवासेफालिका
कुब्जकं ॥ वासन्तीशतपत्रिकाविचकिलमनकीहृयंशीताह्वालकनागकेशरवकंपुष्पंरवेःशस्यते ॥ १

६॥ लोध्रं कैरवमुत्पलं च सकलं सिंहास्यकं पाटलायूथीकुंकुमकर्णिकारतिलकं बाणांकदम्बं जया ॥ का
शं केशरकेतकीमरुवकं द्रोणाह्वि संध्यालयं पुष्पं शस्तमिदं च पूजनविधौ सर्वं सहस्रार्च्चिषः ॥१७॥ ॥
॥ अथ कालविशेषः ॥ भविष्ये ॥ मुकुलानि कदंवानि रात्रौ देयानि भानवे ॥ दिवा शेषाणि पुष्पाणि दि
वा रात्रौ च मल्लिका ॥१८॥ ॥ अथ निषिद्धानि ॥ तत्रैव ॥ कल्ललोन्मत्तकं कांचीतथा न गिरिकर्णिका ॥ नकं
टकारिका पुष्पं तथान्यं गंधवर्ज्जितं ॥१९॥ नवाम्लाटकजैः पुष्पैरर्च्चनीयो दिवाकरः ॥ ॥ यामले ॥ नाक्षतै
रर्च्चयेद्विष्णुं न तुलस्या विनायकं ॥ २० ॥ न दूर्वया यजेद्दुर्गां सूर्यस्य तगरं तथा ॥ ॥ शातातपीये ॥ शि
वे विवर्ज्जयेत्कुंदमुन्मत्तं च तथा हरेः ॥२१॥ न दूर्वया यजेद्दुर्गां विल्वपत्रैर्द्दिवाकरं ॥ तगरनिषेधो वन
नगरीयविषयमित्याचारचिंतामणिकारः ॥ ॥ निषिद्धं विहितमिति केचित् ॥ निषिद्धं विहितं सूर्ये त
गरैकंटकारिकेति वचनात् ॥ ॥ अथ ग्रहाणां ॥ भविष्ये ॥ दयारि कुसुमैः सूर्यं कुमुदैः सूर्यमर्च्चये

त् ॥ क्षितिजं तु जवापुष्पैश्चम्पकेन तु सोमजं ॥ १ ॥ शतपत्रैर्गुरुः पूज्यो जातीपुष्पैस्तु भार्गवः ॥ मल्लिकाकु
सुमैः पंगुः कुंदपुष्पैर्विधुंतुदः ॥ २ ॥ केतकीविविधैः पुष्पैः शांतिकालेषु सर्व्वदा ॥ ॥ अथ श्राद्धरहस्य ॥ ः
विष्णुपुराणे ॥ तुलसीशतपत्रं च भृंगराजं च चम्पकं ॥ तगरं मारुतं चैव पितृणां मोक्षदायकाः ॥ १ ॥ ॥
पुष्पमालायां ॥ माधवीतगरं कुंदकुब्जकं यूथिकाजलजं चम्पकोत्पलं ॥ कैरवं च शतपत्रिका तथा
श्राद्धकर्म्मणि पुत्रं तुलस्यपि ॥ २ ॥ ॥ अथ निषिद्धानि तत्रैव ॥ उक्तेतरं लोहितमप्रशस्तं मंदारमुको
द्भवमातिकेव ॥ शुक्लेतरं गंधविहीनमुग्रगंधं च पुष्पं न हितं पितृभ्यः ॥ ३ ॥ वर्वरीकुसुमं चैव केत
कीकरवीरयोः ॥ जातीदर्शनमात्रेण निराशाः पितरो गताः ॥ ४ ॥ ॥ इति श्रीपुष्पचिन्तामणौ द्विती
यः प्रकाशः ॥ २ ॥ ॥ अथ दुर्गायाः ॥ ॥ देवीपुराणे ॥ पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः ॥ अपर्यु
षितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्ज्जितैः ॥ १ ॥ आत्मारामोद्भवैर्वापि गत्वा संपूजयेच्छिवां ॥ ऋतुकाः

लोद्ध्रैः पुष्पैर्मल्लिकाजातिकुब्जकैः ॥२॥ सितरक्तैश्च नीलैश्च तथा रक्तैश्च पाटरैः ॥ किंशुकैस्तगरैश्चैव
अक्कुरण कचम्पकैः ॥३॥ वकुलैश्चैव मंदारैः कुंदपुष्पैः किरीटकैः ॥ करवीरार्कपुष्पैश्च शेशिवैश्च
पराजितैः ॥४॥ सितरक्तैस्तथा पीतैः हासैश्चैव चतुर्विधैः ॥ धुस्तूरकातिसुक्तैश्च वंधुकागस्त्यसंभवैः ॥५॥
दमनैः सिंधुवारैश्च सुरभीमरुकैस्तथा ॥ लतानिहृस्य हृस्वस्य दुर्वांकुरैश्च कोमलैः ॥६॥ मंजरीभिः
कुशानां च बिल्वपत्रैः सुशोभनैः ॥ धान्यानां सर्वपत्रैश्च पुष्पैश्चैव प्रपूजयेत् ॥७॥ अलाभेन तु पुष्पाणां
पत्राण्यपि निवेदयेत् ॥ पत्राणामप्यलाभे तु फलान्यपि निवेदयेत् ॥८॥ फलानामप्यलाभे तु तृणः
गुल्मौषधीरपि ॥ औषधीनामलाभे तु भक्त्या भवति पूजनं ॥९॥ भविष्यपुराणे ॥ सुरभीणि च द्वी
णि स्थलजान्यम्बुजान्यपि ॥ गन्धाभि शिरसा नित्यं यो मे भक्त्या प्रयच्छति ॥१०॥ ॥ अथ पुष्पविशेषः
प्राणांफलानि ॥ मल्लिकास्तूत्पलं पद्मं शमीपुन्नागचम्पकं ॥ अशोककर्णिकारं च द्रोणपुष्पं विशे

वतः ॥ ११ ॥ करवीरंजवापुष्पं.कुंकुमंनागकेशरं ॥ यःप्रयच्छतिदुर्गायैपुष्पाण्येतानिभारत ॥ १२ ॥ च
ण्डिकायैनरश्रेष्ठश्रद्धाभक्तिसमन्वितः ॥ सकामानखिलान्प्राप्यदुर्गायानुचरोभवेत् ॥ १३ ॥ पुन्नाग
श्चपकःकुंदोयूथिकानवमल्लिका ॥ तगरोर्ज्जुनमल्लीचबृहतीशतपत्रिका ॥ १४ ॥ तथाकुमुदक
ह्लारबिल्वपाटलमालती ॥ जवाविविन्तिलाशोकरक्तनीलोत्पलानिच ॥ १५ ॥ दमनोमरुपत्रञ्चश
तपुष्पंविवर्द्धये ॥ ॥ तथा ॥ सुगंधिगंधिपुष्पैस्तुपूजयेद्यस्तुचंडिकां ॥ १६ ॥ मुक्तिनिर्मालयावा
पिसोश्वमेधफलंभेत ॥ ॥ मालालक्षणमाह ॥ महाकालसंहितायां ॥ एकजातीयकैःपुष्पै.र्भिन्नजाती
यकैरपि ॥ १७ ॥ मालातथैकवर्णास्याद्भिन्नवर्णापिवाप्रिये ॥ सापुनस्त्रिविधाज्ञेयापरिणाहवशेनतु ॥
१८ ॥ पतेहृदयपर्यन्तं.यामालामोदशालिनी ॥ रक्षितासापरिज्ञेया.सर्व्वावरतयास्थिता ॥ १९ ॥ ग्र
धावलंबिनीनाभेःकौसुमीयासमुच्यते ॥ साधारणीपरिज्ञेया.मध्यमापूर्व्वतोधिका ॥ २० ॥ आगुल्फसं

स्मिनीयान्तु पदपद्मोपरिस्थिता ॥ वनमालेति विख्याता सर्वाभ्यः सुगन्धा उत्तमाः ॥२१॥ कश्चिद्विशेषोऽत्रापि
तम्पि व्याहरामि ते ॥ करवीरैश्च वा पुष्पै.र्वकै.र्दमनकैरपि ॥ २२ ॥ नीलोत्पलैः सरसिजै.र्लवंगैर्नागके
शरैः ॥ जातीभिर्मालतीभिश्च मल्लिकाचम्पकादिभिः ॥ २३ ॥ रचिता या नवेपुर्दिस्रजः परमशोभना ॥ इ
मालाभ्योऽन्येभ्य एतास्तु देव्याः प्रीतिप्रदायिकाः ॥२४॥ अतोऽन्येषु प्रसूनेषु दिव्येषु वरवर्णिनि ॥ अभी
भिः कुसुमैस्तां यां यत्नेयत्नमाचरेत् ॥२५॥ ॥ अथ पुष्पविशेषेमालाफलानि ॥ नाविष्णुराणि ॥ वकपु
ष्पस्रजोभिस्तु पूजयेद्यस्तु चण्डिकां ॥ वाजपेयस्य यज्ञस्य फलं विन्दति मानवः ॥२६॥ द्रोणपुष्पस्य तद्वे
व ॥ द्रोणपुष्पस्रजोभिस्तु पूजयेद्यस्तु चण्डिकां ॥ राजसूयफलं प्राप्य शक्रलोके महीयते ॥२७॥ शमी
पुष्पस्य ॥ शमीपुष्पस्रजोभिस्तु आर्यां संपूज्य श्रद्धया ॥ गोसहस्रफलं प्राप्य विष्णुलोके महीयते ॥२
८ ॥ तथा ॥ कुशपुष्पस्य ॥ पूजयित्वा तु राजेन्द्र श्रद्धया विधिवन्नृप ॥ कुशपुष्पस्रजोभिस्तु पितृलोके

महीयते ॥ २९ ॥ विल्वपत्रमालाद्वयस्य ॥ मालाद्वयेनसंपूज्य.दुर्गादेवीनराधिप ॥ विल्वपत्रस्यपत्रा
णांराजसूयफलंलभेत् ॥ ३० ॥ नीलोत्पलमालायाः ॥ नीलोत्पलस्रजोभिस्तुपूजयेद्यस्तुचण्डिकां ॥
वाजपेयफलंप्राप्यरुद्रलोकेमहीयते ॥ ३१ ॥ तथा ॥ नीलोत्पलसहस्रेणयोमालांसंप्रयच्छति ॥ चण्
डिकायैनरश्रेष्ठतस्यपुण्यफलंशृणु ॥ ३२ ॥ वर्षकोटिसहस्राणिवर्षकोटिशतानिच ॥ दुर्गायानु
चरोभूत्वा.रुद्रलोकेमहीयते ॥ ३३ ॥ कालिकापुराणे ॥ विल्वपत्रैरखण्डैर्यःसकृद्देवीप्रपूजये
त् ॥ सगोलक्षफलंप्राप्यदुर्गायानुचरोभवेत् ॥ ३४ ॥ अन्यत्रापि ॥ सर्व्वत्रविल्वपत्रस्य.देवीप्रीति
करंपरं ॥ ॥ अथप्रतिमासिपुष्यार्च्चनविधानं ॥ देवीपुराणे ॥ वैशाखेमासिकर्त्तव्यापूजापाटल
यासदा ॥ सर्व्वान्कामानवाप्नोतिज्येष्ठेपद्मार्च्चनैःसदा ॥ ३५ ॥ आषाढेविल्वकह्लारैर्विहितंलभते
फलं ॥ नवमालिकयापूजा.नभोमासिमहाफला ॥ ३६ ॥ कदम्बैश्चम्पकैरेवंनभस्यसर्व्वकामदाः

। पूजापंकजमालत्याईप्सेसुदयदायिनी ॥३७॥ शतपत्रिकया पूजा कार्त्तिकी सार्व्वकायिकी ॥ मार्गे
नीलोत्पलैः पूजा पौषे तु कुब्जकैः सदा ॥३८॥ माघे तु कुंदकुसुमैर्म्मरुवकेन फाल्गुने ॥ श्वेतपद्मैस्त
था चैत्रे यः कुर्य्यात्सुरसत्तम ॥३९॥ लभते सर्व्वविज्ञानं सर्व्वदानफलं लभेत् ॥ ॥अथ कालाः॥ भ
विष्यपुराणे ॥ कदम्बैरर्च्चयेद्रात्रौ मल्लिकासुमयोस्तथा ॥ दिवा शेषाणि पुष्पाणि यथालाभं प्र
पूजयेत् ॥४०॥ ॥अथ निषिद्धानि॥ मत्स्यसूक्ते ॥ मकालस्यात्कलं तुलसी झिण्टिका काचनं तथा
॥ न दूर्व्वया यजेद्दुर्गां कमलैः कमलां नहि ॥४१॥ ॥शातातपीये॥ शिवे विवर्ज्जयेत्कुंदमुन्मत्तं वत
था हरेः ॥ देवीनां चार्कमंदारौ सूर्य्यस्य तगरं तथा ॥४२॥ मंदाराक्षौ निषेधौ दुर्गेतरदेवीपरमात्मा
वारचिन्तामणौ ॥ अत्र दुर्गेतरदेव्याः सती सा विम्बादय ॥ ॥ वकुलैश्चैव मन्दारैरिति वक्ष्यमाणा सितापू
जनप्रकरणे ॥ वन्दनं चार्ककुसुमं देयाश्वेतापराजितेति ॥ ॥नीलतंत्रे॥ नक्षत्रविद्यायामर्द्धनद

248

र्शनात् ॥ बकुलैश्चैव मन्दारैरिति मत्ताकालसंहितं यामसिता पूजायां दर्शनात् ॥ देवीपुराणे ॥ मुकु
लैर्नार्च्चयेद्देवीमपक्वेनानिवेदयेत् ॥ फलं च क्रिमिविद्धं च कालापक्वमपि त्यजेत् ॥ ४३ ॥ केशकीटाः
दिविद्धानि शीर्णपर्युषितानि च ॥ स्वयंपतितपुष्पाणि त्यजेदुपहृतानि च ॥ ४४ ॥ कालापक्वमिति
कालपक्वं, अकालजातफलमित्यर्थः ॥ ॥ पुष्पाध्याये ॥ सर्वैः पुष्पैः सदा पूजा विहिता विहितैर
पि ॥ कर्त्तव्या सर्वदेवानां भक्तियोगोत्र कारणं ॥ ४५ ॥ किं च ॥ देवीपूजा सदा कार्या जलजैः स्थल
जैरपि ॥ निषिद्धैर्विहितैर्वापि भक्तियोगो च कारणमिति राघवभट्टः ॥ ४६ ॥ ॥ इति श्रीपुष्पचि
न्तामणौ तृतीयः प्रकाशः ॥ ३ ॥ ॥ अथ भगवत्याः सिंहासनविद्यायां तन्त्रोक्तपुष्पविधानं लि
ख्यते ॥ तत्रादौ पश्चिमाम्नाये ॥ तथा चोक्तं मन्थानभैरवे मेदिनीकूर्मप्रस्तारे ॥ ॥ भैरव उवाच
॥ अथातः संप्रवक्ष्यामि, द्रव्याणां निर्णयं स्फुटं ॥ पुष्पाणां वसुरेशानि, क्रमसंभारलक्षणं ॥ १ ॥ जा

नीवपाटलीयूथी चम्पकैः श्वेतउत्पलैः॥ केतकीहेमजातीचसुन्दरैः शतपत्रकैः॥२॥ नीलोत्पलैस्तथाः
वालीकरवीरैः कदम्बकैः॥ बंधूकपद्मकुन्दाख्यैः शालिपुष्पैश्च पाटलैः॥३॥ कुसुम्भैः किंसुकैः पुष्पैः पु
न्नागनागकेशरैः॥ बकुलैश्चागरैश्चान्यैर्द्रवकुंदाख्यसज्ञकैः॥४॥ काशशर्देन्द्रवैर्द्दविचित्रसंघैः कर्णिकार
कैः॥ रक्तोत्पलैर्मल्लपुष्पैर्येर्वान्ये चारुगंधवान्॥५॥ भुक्तिमुक्तिप्रदा जाती वालीवलविवर्द्धिनी॥ श्वे
तपाटलिकादेविवदन्ति वमरुद्रशः॥६॥ शान्तिपुष्टिकरं पद्मं शतपत्रं सुपत्रदं॥ बंधुकं वश्यदं प्रोक्तं
तथा रक्ता स्वमारकाः॥७॥ सौभाग्यं शालिपुष्पैश्च सुन्दरं सुखदायकं॥ कदम्बं वकुलं कुंदं च वकुंदोघ
नाशनं॥८॥ कुसुम्भं किंसुकैर्द्दिवि शोभा हृष्टिकारके॥ महालक्ष्मीप्रदौ पुष्पौ पुन्नागनागकेशरौ॥
॥९॥ रक्तमुत्पलकं वश्यं नीलकृष्णं च मारणे॥ त्रिसंध्यासंभवैः पुष्पैः शत्रूणां च भयावहं॥१०॥ दमनं तु
लसी मरुद्र, सर्वपापक्षयंकरं॥ सिंदूरी वश्यकृत्पोक्ता, सदाकर्षणमानका॥११॥ त्रिसंध्यासम्भवैः

राम:
२८

२५१

पुष्पैः क्रमेणाप्यर्च्चयेत्सदा ॥ तस्य विघ्नो न जायेत सत्यमेॅन्न संशयः ॥१२॥ ॥अथ निषिद्धानि ॥ तथा ॥
विल्वपत्रैर्म्महाहानिः उग्रशोकाकुलक्षयं ॥ मारुतं मृत्युदं भद्रे शोकसंतापकारकं ॥१३॥ उन्मत्तेन कु-
लोत्पातं सर्व्वरी वश्रियापहा ॥ मल्लिनं दुःखदं प्रोक्तं क्रिमियुक्तं महद्भयं ॥१४॥ संकिताकेशसंयुक्तं
वंधुहानिं करोति तत् ॥ तस्माद्विप्रयत्नेन शुभैः पुष्पैः प्रपूजयेत् ॥१५॥ ॥अथोत्तराम्नायस्यः ॥ त-
थावमहाकालसंहितायां ॥ शिरीषैः कर्णिकारैश्च चंपकैः कोविदारकैः ॥ वकुलैश्चैव मन्दारैः कुंद-
पुष्पैः कुरुण्टकैः ॥१६॥ लताभिर्द्रुलहदक्षस्य मृदुदुर्व्वाङ्कुरैरपि ॥ कांचनालैरशोकैश्च पुन्नागैः के-
तकीदलैः ॥१७॥ सेफालिकाभिर्यूथीभिर्जातीभिर्दमनैरपि ॥ शतवर्गैर्म्मल्लिकाभि रम्लानैर्वन्धु-
जीवकैः ॥१८॥ झिण्टीभिश्च जवापुष्पैः करवीरैश्च किंशुकैः ॥ पारिजातैः पाटलैश्च पद्मैर्नीलोत्पलैर-
पि ॥१९॥ माधवीभिर्म्मरुवकैरपराजिताश्चपि ॥ अनेकैश्च कदम्बैश्च द्रोणपुष्पैः सकेशरैः ॥२०॥

अर्च्चयेत्कुसुमैरेतैर्देवी.साधकसत्तमः॥ तथा॥ विल्वपत्रंयथाप्रीतिकरंदेव्यावरानने॥ २१॥ नतथान्यत्किंचि
दस्तिपुष्पेषुप्रीतिकारकं॥ अतोयत्नेनदातव्यंविल्वपत्रंत्रिपुत्रसुकं॥२२॥ ॥अथनैमित्तिके॥ तथा॥
प्रादूर्ष्यवकुलानांहिवैशाखेमासिकारयेत्॥ नागकेशरपुष्पाणांज्येष्ठेचाधिकमाचरेत्॥२३॥ आषा
ढेतुप्रकर्त्तव्यःकरवीरस्यसंचयः॥ चम्पकोत्पलपद्मानांश्रूयत्नंननसीष्यते॥३४॥ वाकुल्यल्लोध्रपुष्प
स्यमासिभाद्रपदेचरेत्॥ नियिष्टधाविधातव्या. वंधूकस्याश्विनेतथा॥३५॥ अगस्त्यकुसुमानांहिसू
रिताकार्त्तिकेचरेत्॥ आधिक्यंविल्वपत्राणांमार्गशीर्षेसदाचरेत्॥३६॥ पौषेदुर्वांकुराणांहिसंदो
होतिफलप्रदः॥ कुंदस्तामोमाघेमासे.सर्व्वकल्याणकारकः॥३७॥ फाल्गुणेमाधवीपुष्पं.सर्व्वसिद्धि
विधायकं॥ चैत्रेशोकस्यकलिकाकलिकालविनाशिनी॥३८॥ मालतीयूथिकाचैवदमनंकसिंः
कारकं॥ कुरण्टकंमरुवकमम्लानंपाटलातथा॥३९॥ नवमालिकार्कपुष्पंतथाचैवातिमुक्तकः॥

रामः
२९

280

एकादशैतानि सदा कुसुमानि वरानने ॥ ४० ॥ देयानि जगदम्बायै नरैर्न्नैमित्तिकार्च्चने ॥ ॥ अथ काङ्
म्यः ॥ तथा वोक्तं द्भरावतंत्रे ॥ मालतीकुसुमैर्द्देवि वागीशत्वप्रदायिका ॥ ४१ ॥ वशगाः स्युर्म्महीपाला जा
तीपुष्पैर्न्न संशयः ॥ मेधाः स्युर्यूथिकाभिश्च नृपत्वं नागकेशरैः ॥ ४२ ॥ माधवीभिर्म्महीपाला हेमला
भश्चम्पकैः ॥ स्वातिसुक्तैर्बुद्धिवृद्धिर्म्मल्लिकाभिर्द्धनागमः ॥ ४३ ॥ कुंदैः कीर्त्तिमवाप्नोति बंधुकैर्बांधवप्रियः
॥ जवापुष्पेणरिपवः संक्षयं यांति तत्क्षणात् ॥ ४४ ॥ पद्मैरायुरवाप्नोति कुमुदैः कविता भवेत् ॥ कदं
म्बैर्व्याधिनाशः स्याद्दत्तानैर्बुद्धिनाशो भवेत् ॥ ४५ ॥ जयप्राप्तिर्म्मरुवकैर्गजलाभः कुरुण्टकैः ॥ तथापराजिता
पुष्पैर्भवेत्सर्व्वाङ्गसुंदरः ॥ ४६ ॥ सेफालिकाप्रसूनेन सुवलाभः प्रदृश्यते ॥ शोकहानिरशोकेन वकुलैः
कुलमान्यता ॥ ४७ ॥ दुर्व्वया धनधान्यानि शाल्मल्या शत्रवः क्षयाः ॥ द्रोणपुष्पेणान्नलाभो वकपुष्पैर्द्ध
र्न्नागमः ॥ ४८ ॥ राज्यलाभश्च पुन्नागैः कर्णिकारैर्व्वहून्नीतिः ॥ दीर्घायुस्त्वं पटोलेन तगरैः सर्व्वमान्यता ॥

॥४९॥ पलाशकुसुमैर्द्देवि वकुगोजाविकारकः ॥ शिरीषपुष्पैः प्रमदा जयन्त्या वजयं श्रियः ॥५०॥ करवी
रैर्मंत्रसिद्धिर्विल्वपत्रैः परांगतिं ॥ सोत्पुक्यां कामनायांतु शितपुष्पं प्रशस्यते ॥ ५१॥ उच्चाटनवशीकारे
प्रीतये वैरीणां जये ॥ गंधपुष्पविशेषेणा कर्त्तव्यं लोहितेसदा ॥ ५२॥ मोहने कामिनीलाभे पीतमेवोत्तः
यं मतं ॥ कृत्यानिवारे द्वेषेव मारणे वासितं द्रव्यं ॥ ५३॥ ॥नावचूडामणौ ॥ दत्ते चैव जवापुष्पे पट्टवस्त्र
फलं लभेत ॥ ब्रह्महत्यादिकं पापं क्षणान्नश्यति निश्चितं ॥ ५४॥ अपरायास्तु माहात्म्यं. मया वक्तुं न श
क्यते ॥ श्वेताया द्विगुणं पुण्यं. दद्यात्कृष्णापराजिता ॥ ५५ ॥ ॥तथा ॥ अपराकुंदमध्ये तु कुलस्थानं म
नोहरं ॥ हपरिकुसुमं देवः स्वयमत्ति सदाशिवः ॥ ५६॥ तन्मध्ये लघुमादाय पुष्पमध्ये तु चंदनं ॥ रक्तकुंकु
मरागं वा कृत्वा तत्र शिवात्मकं ॥ ५७॥ योजयेत्किवशक्त्यास्त. ऐकं संभावयन् धिया ॥ क्षणं विचिन्त्यतः
चैव संचिन्त्य परमेश्वरी ॥ ५८॥ जवादद्देतत्कुंडोत्थं द्रव्यं परमदुर्ल्लभं ॥ अमृतादधिकं ज्ञेय. मेतद्द्रव्यं:

रामः
३०

252

तुसाधकैः ॥ ५९ ॥ ॥ अथ निषिद्धानि ॥ महाकालसंहितायां ॥ तुलसीभिरपामार्गैर्भूस्तरैः सिंधुवारकैः
॥ अर्कपत्रैर्ब्बाणकैश्च नैव देवीं प्रपूजयेत् ॥ ६० ॥ देवीमित्यसितेत्यर्थः तत्प्रकरणोक्तत्वात् ॥ ॥ अथ
दक्षिणाकाल्याः ॥ कालीतंत्रे ॥ नानोपहारबलिभिर्न्नानापुष्पैर्म्मनोरमैः ॥ अपामार्गदलान्यैश्च तुलसीव
र्ज्जितैः शुभैः ॥ १ ॥ पूजनीया सदा भक्त्या नृणां शीघ्रफलाप्तये ॥ ॥ तथा ॥ सुगंधैः श्वेतलोहित्यैः कुसुमैरद्वे
यत्कुलैः ॥ २ ॥ बिल्वैर्म्मरुवकाद्यैश्च तुलसीवर्ज्जितैः शुभैः ॥ द्रोणपुष्पैर्व्विशेषेण वज्रपुष्पेण मिश्रितैः ॥ ३ ॥
॥ ॥ मुंडमालातंत्रे ॥ पुष्पाण्यपि तथा दद्याद्धृद्यक्तघ्नासितानि च ॥ श्वेतपुष्पं जवापुष्पं करवीरं तथापि
ये ॥ ४ ॥ तगरं मालती जाती, सेवन्ती यूथिका तथा ॥ धुत्तूराशोकवकुले, श्वेताकृष्णापराजिता ॥ ५ ॥ व
कपुष्पं बिल्वपत्रं चम्पकं नागकेशरं ॥ मल्लिकाझिण्ठिकां चीवरक्तं यन्यरिकीर्त्तितं ॥ ६ ॥ अर्कपुष्पं को
कनदं बर्व्वरं च प्रियेसदा ॥ अष्टम्यां च विशेषेण तुष्टा भवति कालिका ॥ ७ ॥ पद्मपुष्पेण रक्तेन संतुः

थःसर्व्वदेवताः॥कृष्णावायदिवाशुक्लाकालिकावरदाभवेत॥८॥श्मशानधुस्तूरेणैवतुष्टाधूमावती
परा॥वन्यपुष्पैश्चविविधैस्तुष्टाभवतिसर्व्वदा॥९॥आमलक्यास्तुपत्रेणतुष्टाभवतिपार्वती॥ ॥शक्तियाम
ले॥सावित्रीचभवानीचदुर्गादेवीसरस्वती॥१०॥योर्च्चयेत्तुलसीपत्रैःसर्व्वकामस्तुसिद्ध्यति॥ ॥अथनीलः
सरस्वत्याः॥तथाचोक्तंनीलतंत्रे॥अष्टम्यांचचतुर्द्दश्यां.पूजयेच्चयथाविधि॥आज्ञासिद्धिमवाप्नोतिजवाः
पुष्पंचवर्व्वरी॥१॥चन्दनंचार्क्ककुसुमंदश्याश्वेतापराजिता॥वंधूकमालयातुष्येत्तथाछागप्रदानवत्
॥२॥ख दद्यात्प्रयत्नेननित्यपूजासुसर्व्वदा॥ ॥मत्स्यसूक्ते॥पुष्पंश्रेष्ठंरक्तकोकंवंधूकंशतपत्रकं॥३॥
वर्व्वरीद्वितयंचैव.कर्णिकारद्वयंतथा॥वकमन्दारधूतानिकरवीराणिशस्यते॥४॥संधिकात्रितयंः
जातीद्वौमपुष्पजयन्तिका॥विल्वपत्रंकुरवकंमुनिपुष्पंचकेशरं॥५॥वासकीद्वितयंचैवकाशपुष्पं
मरुवकं॥दमनंचलवंगंचयूथीसेफालिकातथा॥६॥सुगंधिश्वेतलोहितैःकुसुमैरर्च्चयेत्कुलैः॥कुलै

वामः
३१

252

रितिप्रणाम्यं ॥ ॥अथनिषिद्धानि ॥ त्रिशक्तिरत्ने ॥ तुलसीमालतीवर्ज्यंपुष्पंदद्यात्प्रसन्नधीः ॥ ॥
॥ कुलचूडामणावपि ॥ वर्ज्जयेन्मालतीपुष्पं. वर्ज्जयेत्तुलसीदलं ॥ ॥अथोर्द्धाम्नाये ॥ वामकेश्वरतंत्रे
मंदारंपारिजातंच. ऐश्वर्यंसौभाग्यदायकं ॥ पीतजातीसर्व्वकालं. विशेषस्तंननेहितं ॥१॥ खर्ज्जूरपुष्पंजाती
च.कुंदश्रीवृद्धिदायकं ॥ बंधुकंभोग्यसौभाग्यंजवाचत्रिपुराप्रिया ॥२॥ उत्पलंधनवृद्धिंचपद्मंपौष्टि:
कमेवच ॥ पुन्नागंसर्व्वसंपत्तिंचक्रकेधनहानिकं ॥३॥ कह्लारोल्लासवृद्धिंचकेतकीचविवर्ज्जयेत् ॥ मरु
श्चनिष्फलंज्ञेयंमल्लिकादुःखदायिका ॥४॥ चम्पकःपुत्रकामस्तुत्रिसंध्यादुःखमोचका ॥ द्रोणंमोक्ष:
मवाप्नोतिसेवन्तीसर्व्वसिद्धिदा ॥५॥ सेफालिकाजयकरीकर्णिकावृद्धिदायका ॥ कुमुदंप्रीतिदंचैव
सुदर्शनंधनप्रदं ॥६॥ करुणःसिद्धिसौभाग्यंनीलद्रव्यंतुहानिकं ॥ दमनंसर्व्वसंपत्तिंविलपत्रंपराप्रि
यं ॥७॥ निर्गन्धोत्कटगंधंच. वर्ज्जयेच्चक्रपूजने ॥ कृष्णापराजितामृत्युःस्तुतमालीतथैवच ॥८॥ मः

ल्लिकानामसंज्ञाया. दुःखदामृत्युदासदा ॥ झिंटीव्याघ्रिप्रदावैव. क्लेशयुक्तघ्ननिकं ॥ ९ ॥ क्रिमियुक्तं
महाभीतिराजदंडमहद्भयं ॥ इत्येतत्पुष्पमाहात्म्यं. ज्ञात्वाश्रीत्रिपुरांयजेत ॥ १० ॥ ॥ ज्ञानार्णवे ॥
जवापुष्पैमहेशानि. पूर्ववत्पूजयेच्छिवां ॥ मासमात्रेण हन्त्येव. पातकंशतजन्मकं ॥ ११ ॥ सौभाग्यंचै
नवेन्मंत्री. त्रिपुरायाःप्रसादतः ॥ श्वेतपुष्पैर्महेशानि. मल्लङ्भिःपूजयेन्नरः ॥ १२ ॥ नाशयेत्पातकंसर्वं
मासमात्रंप्रपूजयेत ॥ त्रिलोकंवशगंतस्य. सर्वपापंदहेद्ध्रुवः ॥ १३ ॥ बिल्वपत्रैश्चजलजैः सत्यैश्च
परिपूजयेत ॥ पूर्ववत्परमेशानि. मासमात्रंपसन्नधीः ॥ १४ ॥ समृद्धिवान्भवेन्मंत्री. सर्वपापंहरेत्स
दा ॥ मल्लिकामालतीजाती. कुंदैश्चशतपत्रकं ॥ १५ ॥ श्वेतोत्पलसुशीतैश्च. पूजयेन्मासमात्रकं ॥
कुल्लावारक्तमेणैव. पातकंशतजन्मकं ॥ १६ ॥ ब्रह्महत्यादिजनितंनाशयेन्नात्रसंशयः ॥ मुक्ति
स्तस्यकरेदेवि. वाचाजीवसमोभवेत ॥ १७ ॥ अगस्त्यप्राणवंधूकजवारक्तोत्पलैःप्रिये ॥ पूर्ववः

क्रमेणसंपूज्यमासमेकंप्रसन्नधीः ॥ १८ ॥ पातकंनाशयेन्मन्त्रीसाक्षात्कामसमोभवेत् ॥ चम्पकैःपाटलैर्द्देवि
बकुलैर्न्नागकेशरैः ॥ १९ ॥ बकुलैःसिंधुवारैश्चपूजयेत्पूर्व्ववत्क्रमात् ॥ सौभाग्यमतुलंतस्य मासमात्रेण
जायते ॥ २० ॥ पापंविनाशयेद्देवि यदिजन्मसहस्रकं ॥ ॥ अथनिषिद्धानितत्रैव ॥ पुष्पैःपर्यु-
षितैर्द्देविनार्च्चयेत्त्वणकैरपि ॥ निर्म्माल्यभूतैःकुसुमैरुत्थितैःपरमेश्वरि ॥ २१ ॥ ॥ बाराहीतन्त्रे
॥ पलाशकाशकुसुमैर्न्नार्च्चयेद्दूरतस्त्यजेत् ॥ धात्रीतमालजैःपत्रैस्तुलसीछितयेत्तथा ॥ २२ ॥ पू-
जनात्पातकीवेत्स्यादिन्द्रस्यापिकरेछियं ॥ त्रिपुरापूजनेवर्ज्यातुलसीसर्व्वदाबुधैः ॥ २३ ॥ तुलसीः
घ्राणमात्रेणक्रुद्धाभवतिसुंदरी ॥ ॥ कौलालवीये ॥ भैरवीसुंदरीताराब्रह्मविष्णुविवस्वतां ॥
॥ २४ ॥ तुलसीवर्ज्जितांपूजा सापूजाविफलाभवेत् ॥ अत्रभैरवीसुंदरीताराप्रसंगेब्रह्मविष्णुविव-
स्वतांपूजा तुलसीवर्ज्जिता अविफलासफलेत्यर्थः ॥ नतुकेवलब्रह्मविष्ण्वादिपूजने ॥

कृ५

॥तंत्रसारकारस्वरसोऽप्येवं ॥ तुलसीनिषेधन्तु दिव्यवीरपरमिति॥ ॥नानातन्त्रसुधार्णवे॥ तत्रिन्त्यं॥
दिव्यवीरयोरेव निषिद्धप्रतिपादकवचनाभावात्॥ ॥क्षेत्रे पाशुपतेः पदे हिमवतो गुह्येश्वरीसन्नि
धौ श्रीजङ्गनुनिमप्रतापनृपते राज्येति सौख्यास्पदे ॥ कृत्वा वार्य्यसुतः शिवार्हितमतिः श्रीमत्प्रतापाह्व
यो मायासिंह इमं समाप्तमकरो श्रीपुष्पचिन्तामणिं॥ ॥दृष्टदोषान्वितं ग्रंथं सत्कविः किन्नमन्यते
॥ सकलङ्कं यथालोके सुधांशुं सुधीजनः॥ ॥इति श्रीश्रीप्रतापमल्लनृपकारितमायासिंहकृते पु
ष्पचिन्तामणौ चतुर्थः प्रकाशः समाप्तः॥ ॥यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्॥ तत्सर्वं क्षम्यतां
देवि प्रसीद परमेश्वरि॥ ✤ ॥श्रीशाके १७॰११ श्रावणशुक्लचतुर्थीपरपंचमीश्रीरविवारे इदं ॥रामः॥
श्रीपुष्पचिंतामणिपुस्तकं लिखितं शुभम्॥ ॥श्रीश्रीश्रीभवानीचरणकमलयुगलेभ्यो नमः॥ ३३

254

श्रीगणेशायनमः॥ नारायणवरलं वृद्धीमानन्दीं मृडीशं गणाधिपः॥
पार्वतीप्रसादायं सर्वे रुद्रदनुसा भवाः॥१॥

४२०

सप्तकालीविद्यावली

~~१५४~~

८	९	३
२	७	११
१०	४	६

यो यंत्र पंत्र सुगन्धले डुंगामा हा
लेखनु चन्दनाक्षत पुष्पले पूजनु
व्याघ्रचर्मको धूप गर्नु स्त्रीपुरुष
स्पभया बोलवित्रो नुभयालो भागिज.

श्री ५ को

।२।

ॐ नमश्चण्डिकायै ॥ ॥स्वभक्तसंकल्पितचित्तवृत्तिं संपूरयन्तीं क
पयार्द्रेण न ॥ तपोलसामिन्दुविभूषणस्य वालामपर्णामहमाश्रया
स० मि ॥ ख्याता सप्तशती समस्तभुवने संख्यानपूर्णा कविता ॥ सम्यक्कौ
शायशालिना नतुमग्रन्थैः कृतो निर्णयः ॥ ज्ञात्वा सप्तशतं प्रमाण
मधुना श्लोकाः पुनर्लेखिता स्तस्मात्सप्तशतीतिपाठविषये नासंग
तिः काचन ॥ सप्तशतीति तालव्योदन्त्याप्युक्तः प्रमाणतः ॥ सन्देहो
नात्र कर्तव्यः प्रमाणमुभयं मतं ॥ भूपालेन्द्रमहीश्वरेण वलिते नेपा ॥१॥
लभूमण्डले ॥ कान्तीनामपुरे सुखेकनिलये पीठैः समलैष्टुते ॥ चण्डी
भक्तिपरेण चानुनवमीसिंहेन सन्मत्रिणा ॥ तेन भक्तविनोदिनी च

२५५

सकलान्याहृत्यनन्त्राण्यपहो॥ ॥मरीचिकल्पे॥ ब्रह्मलोकेसुखासीनंसु
रासुरगुरुंप्रभुं॥ अगस्त्यःपरिपप्रछसाष्टाङ्गःप्रणिपत्यच॥ अगस्त्य
स्यपुलस्त्यस्यदुर्वासारण्यकादयः॥ एवमादिमुनीन्द्राणांवृन्दमध्ये
पितामहं॥ पप्रछतंमुनिश्रेष्ठअगस्त्यश्चमहात्मवान्॥ ॥अगस्त्यउवा
च॥ केनोपायेनदेवेशमहदैश्वर्यसंभवं॥ शास्त्रज्ञानंकवित्वंचशत्रु
निग्रहणंतथा॥ वश्याकर्षणविद्वेषस्तंभनोच्चाटनानिच॥ स्तंभनंप
रसैन्यस्यस्वसैन्यस्यचरक्षणं॥ एतत्सर्वंसुनिश्चित्यवदमेसुरपूजित॥
॥ ॥ब्रह्मोवाच॥ साधुपृष्टंत्वयाविप्रवक्ष्यामिसकलंतव॥ पार्वत्यैपर
मप्रीत्याशंभुनाकथितापुरा॥ कैलासशिखरेरम्येपार्वत्यासहसंस्थि

तः ॥ सर्व्वलोकोपकारार्थं प्रोक्ता च ऋषभध्वजः ॥ ॥ देव्युवाच ॥ कैला
शपीठमध्यस्थं वीरेशं परमं प्रभुं ॥ उक्ता या तु महाविद्या मूलमंत्रं त्व
या प्रभो ॥ एतन्मे संशयं देव वक्तुमर्हसि शूलभृन ॥ ॥ ईश्वर उवाच ॥
साधु देवि महाप्राज्ञे अपूर्वं परिपृच्छसि ॥ प्रवक्ष्यामि न सन्देहो येन
सिध्यंति साधकाः ॥ सप्तशत्यास्तु सकलं तत्वं वेद्म्याहमेव हि ॥ पादोनं
श्रीहरिर्वेत्ति व्यत्यर्द्धं तु प्रजापतिः ॥ व्यासस्तुर्य्यांसकं वेत्ति कोट्यंशमि
तरे जनाः ॥ कलौ न चण्डीसदृशी सिद्धिदा भुवनत्रये ॥ वामदक्षिणमा ॥२॥
र्गाभ्यामधिकारिफलप्रदेति ॥ ॥ मेरुतंत्रे ॥ अथ सप्तशतीश्लोकमव
स्था ॥ ॥ यमूनित्यातंत्रे ॥ आद्यं ततं विजानीहि सप्तशत्याः शुभावहं

सावर्णिः सूर्य्यतनयः सावर्णिर्भविता मनुः ॥ उवाचादिविंशस
शतश्लोकसुसंख्यकं ॥ मार्कण्डेयस्य वाक्यानि प्रथमाध्यायके भवेत् ॥
त्रयोविंशतिसंख्यास्यान्नागसंख्यानयोः पृथक् ॥ विधेर्वाक्यं कला
संख्या विज्ञेयेकेतथामधौ ॥ मुनेस्त्वेकोनत्रिंशत्स्यात्षडशीतिरि
तीरिता ॥ द्वितीयास्तु सुरेशानिषट्कसप्ततिरिष्यते ॥ तृतीये तु महादे
वि देव्या वाक्यं तथैककं ॥ महिषासुरवाक्यानि श्लोकत्रयमुदाहृ
तं ॥ सप्ताधिकचत्वारिंशत्स्याद्वेकाधिके चतुर्थके ॥ देव्या वेदमनः स्वीकं
देवानां सर्व्वमेव हि ॥ पंचमेध्यायके सप्तत्वारिंशत्शतोत्तरं ॥ ऋ
षिस्तु मातृकासंख्या देवानामष्टसप्ततिः ॥ देव्यास्तु ऋतुसंख्यास्याद्

२

तस्य च त्रयोदश ॥ षष्ठे तु विंशतिः प्रोक्तं सप्तमे रसविंशतिः ॥ अ
ष्टमे त्रसषष्टिः स्यात् चत्वारिंशच्च नवके ॥ दशमे द्वाविंशतिरेका
दशभूमिसप्ततिः ॥ नवत्रिंश द्वादशे स्यात् ततोयेष्टादश स्मृतः ॥ १४वी
स० सप्तशतिः प्रोक्तमथर्वशिरसि स्थितिः ॥ त्रैलोक्येप्यद्भुतं त्रैषु गोपित
॥३॥ तिपुदुर्लभं ॥ एवंभूता महाचण्डी यां विना सिद्धिदा भवेत् ॥ ॥ मंत्रतंत्रेत् ॥
सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्मुनिः ॥ छन्दो गायत्रमुदितं महाका
ली तु देवता ॥ वाग्बीजं पावकस्तत्त्वं धर्मार्थे विनियोजनं ॥ प्रयोगानां तु
नवति र्मारणे मोहने त्वतु ॥ मध्यमस्य चरित्रस्य मुनिर्विष्णुरुदाहृतः ॥ ॥२॥
उष्णिक् छन्दो महालक्ष्मीर्देवता बीजमद्रिजा ॥ वायुस्तत्त्वं धनप्राप्त्यै विनियो
गमुदाहृतः ॥ उच्चाटने स्तंभने च प्रयोगानां शतद्वयं ॥ उत्तरस्य चरित्र

25४

स्य मुनिः शंकर उच्यते ॥ महासरस्वती देवी त्रिष्टुप्छन्द उदाहृतं ॥ का
मबीजं रविस्तत्वं कामाप्तौ विनियोजनं ॥ महा विद्येत्यादि सप्तशत्याः
कल्पेतथादिमे ॥ ब्रह्मेन्द्रगुरुमुख्याणां विष्णु रुद्र सुरद्विषां ॥ उपास्य दे
वता जाताः ताश्चात्र ब्रह्मणा स्तुता ॥ तस्मात्सप्तशतीत्येवं व्यासेन परिकी
र्त्तिता ॥ सौम्यानि यानि रूपाणीत्यत्रपिप निकीर्त्तिता: ॥ उपास्या दक्षि
णमार्गेण तु स्याद्याः सप्तशत्कयः ॥ लक्ष्मीच ललिताकालीदुर्गागाय
त्र्यनुव्रती ॥ सरस्वती चेति सप्त उपास्या वाममार्गतः ॥ काली तारा छि
न्नमस्ता सुमुखी भुवनेश्वरी ॥ वाला कुब्जेति मनवः सूचिता तः प्रकी
र्त्तिता ॥ नाम्ना सप्तशती चेति मध्यमश्चन्नित द्विधा ॥ नते तेच्चौ ह्लसीके

४

ते र्मंत्रव्यक्तिः प्रजायते ॥ स्वंत्तवाभियुक्तानां मित्यारभ्यतत्ती
स॰ यकेपचरित्रे सप्तसत्यास्तु चामुण्डान्ताः प्रकीर्त्तिताः ॥ हंसयुक्ता
विमानाग्रे इत्यारभ्य प्रकीर्त्तिताः ॥ ब्रह्माण्याद्याः सप्तशत्यो वर्त्त
॥४॥ मानास्तु तत्र च ॥ वैवस्वतेन्तरे प्राप्ते इत्यारभ्य तु सप्त च ॥ सत्यः प्रो
क्ताः स्वयं देव्या[illegible]तस्मात्सप्तशती मता ॥ ॥ शास्त्रनित्यातन्त्रे ॥
अथातः संप्रवक्ष्यामि चण्डिकां भक्तवत्सलां ॥ येनिहृयंकुलावि
न्दुनादनादान्त संयुतं ॥ लज्जावीजं कामराजं हे॰ नचामुण्डिकापदं ॥ ॥४॥
विच्चेन वाणीकैत्येकं श्री मायाकालिका कृयं ॥ ॥ मेरुतन्त्रे ॥ अथातः २५०
संप्रवक्ष्यामि चामुण्डाया महामनुं ॥ नवदुर्गात्मकं यस्य सेवनात्तु

विमुक्तय:॥ ॥सप्तशतीकल्पे॥येनविज्ञानमात्रेणापन्नमैश्वर्य्यवान्भ
वेत्॥ऐंवीजमादौनुसमानदीप्तंह्रींसूर्य्यतेजोद्युतिमद्द्वितीयं॥क्लींमू
र्त्तिवैश्वानरतुल्यरूपंतृतीयमानन्दसुखायनित्यं॥चामुण्डजाम्बू
नदकान्तिवीर्य्यं॰मुपंचमंनक्षतरंप्रकल्प्यं॥डाषष्ठमुग्रार्त्तिहरंसुनी
लैयैसप्तमंहक्षतनंरिपुघ्नं॥विपाएडेनमष्टमनादिदिष्टंच्चेधूम्रवर्णं
नवमीविशाली॥एतानिवीजानिनवात्मकस्यजप्तु:प्रदद्यु:सकलार्थसि
द्धिं॥नववीजविशुद्धोयंमन्त्रस्त्रैलोक्यपावन:॥ ॥मेरुतन्त्रे॥सुरथोयत्प्रसा
देननाज्यंप्राप्याभवन्मनु:॥संसारवंधनिर्न्नाशिज्ञानमाप्तंसमाधिना॥
वाकलज्जाकामवीजानिचामुण्डायेपदंवदेत्॥विच्चेनवार्णमन्त्रोयंशक्ति

मंत्रोत्तमोत्तमः॥ ॥हडिमते॥एवंजपतियोमन्त्रीफलंतस्यवदामिते॥
वश्याभवन्तिकामिन्योराजानोनृचराइव॥नहन्तिसर्प्पदावाग्निचौरारा
रा० जभयादिकं॥सर्व्वासमृद्धयस्तस्यजायन्तेचण्डिकाज्ञया॥नश्य
॥५॥ न्तिदारुणारोगाःसंग्रामेजयमश्नुते॥ ॥महाकालसंहितायां॥नशा
स्त्रमालोक्यवदेन्नचरेन्नजपेदपि॥नपश्यन्नो[illegible]पश्याञ्चनकुर्य्या
न्नैवसाधयेत्॥गुरूपदेशतोलब्ध्वाजपंन्यासार्च्चनादिकं॥पश्चात्तंसा
धयेत्सर्व्वंसदाभक्त्याचभावितः॥ ॥वाराहीतन्त्रे॥दीक्षामूलंज ॥५॥
गत्सर्व्वंदीक्षाहिपरमंतपः॥दीक्षामाश्रित्यनिवसेत्यत्रकुत्राश्र
मेनरः॥कोटिजन्मकृतंपापंज्ञानाज्ञानकृतंचयत्॥दीक्षाग्रहण 259

मात्रेण पलायन्ते न संशयः ॥ ततो वाँछितसिद्धिः स्यात्यनभ्रात्यसमृ
द्धिदः ॥ अन्ते देवालयं याति दिव्यभोगसमन्वितः ॥ ॥महाहानकेतन्त्रे॥
अपदीक्षाविहीनो यावर्त्तते भुवि पापभुक् ॥ मोहान्धकारे नरके गर्त्ते पतति
दुःखितः ॥ दीक्षाहीनो शुचिर्न्नित्यमनर्हः सर्वकर्म्मसु ॥ यदन्यत्कुरुते मो
हान्नतस्य फलभाग्भवेत् ॥ ॥तन्त्रराजे॥ आचार्य्याद्दनभिप्राप्तः प्राप्तस्था
स्तदक्षिणः ॥ सततं जपमानोपि मन्त्रं सिद्धिं न गच्छति ॥ ॥मार्कण्डेय॥
ऋषिरुवाच ॥ ॥परिपृच्छसि राजेन्द्र चण्डिकापूजनादिकं ॥ तदहं संप्रवक्ष्या
मि यथावदनुपूर्व्वशः ॥ आदौ नत्वा महालक्ष्मीं कर्त्तुं हर्त्रीं सदोदितां ॥
यन्नमस्कारतो यस्या भवन्ति सुकृताः सकृत् ॥ ॥कुब्जिकातन्त्रे॥ कराङ्घ्रि
क्षालनं चास्त्राद्धृदः शुद्धिस्तु मन्त्रयात् ॥ मुखास्यक्षालनं श्रीवाकडुद्धके

शालिरवाशिखात्॥ नद्यादौ विधिवत्स्नात्वा नाभिमात्राप्सु संस्थितः॥
सप्तशतिकल्पे॥ नमन्ले कीर्त्तिं यस्यामैश्वर्य्यपरिधायनात्॥ इक्षोज
लौमिरात्मानं नवबीजे न प्लावयेत्॥ कृत्वा मध्यान्हिकं सर्व्वमुद्दिकान्तेस
माहितः॥ तत्पूर्वादि महालक्ष्म्याः षडङ्गन्यासमाचरेत्॥ ॐ मायाबी
जं चण्डिकायै श्रीं ह्रीं शिराभ्यां नमः॥ ॐ मायाबीजं हृदयं।१ एवं न्यासविधिं
कृत्वा ध्यात्वा महिषमर्द्दिनीं॥ चण्डिकां त्रिजगद्धात्रीं ब्रह्माद्यमरव
वन्दितां॥ ततो हि नवबीजान्तं चण्डिकां तर्प्पयतामिति॥ जलो जल्पाद्धे
त्तरशतं सुगन्धं कुसुमान्वितं॥ अथवा कोतु तदर्द्धेण तत्तदर्द्धेन वा
पुनः॥ महालक्ष्मीं तर्प्पयित्वा प्रार्थितां लभते ध्रुवं॥ अप्राप्यानपि का
मांश्च कर्त्ता प्राप्नोति तर्प्पणात्॥ प्रविश्य देवतागारे वितानपरिशोभिते॥

260

पुष्पप्रकानशोभाढ्यं पूजाद्रव्यैः प्रपूरितं ॥ वहुदीपप्रकाशाढ्यं दिव्यैः
धूपैः सुधूपितं ॥ तत्रोपविष्टो विधिना पूजयित्वा हनीश्वरो ॥ उपवि
श्यासने मन्त्री प्राङ्मुखो धृतिमान् क्रमी ॥ कामक्रोधमहामोहलोभताप
विवर्जितः ॥ चतुरस्रे समे शुद्धे सर्वदोषविवर्जिते ॥ लिखेदष्टदलं प
द्मं कुङ्कुमागुरुचन्दनैः ॥ पद्ममध्ये लिखेच्चक्रं षट्कोणं च त्रिकालयं ॥
षट्कोणं चक्रमध्यस्थमाद्यवीजत्रयं न्यसेत् ॥ पूर्वादिषु षट्कोणेषु वीजा
न्यादि विन्यसेत् ॥ गुदमेढ्रान्तरं वामपादमूलेन पीडितं ॥ वामपादोप
रि स्थाप्य दक्षिणं चरणं दृढं ॥ एत[illegible]त्पद्मासनं नाम जरामरणवर्जितं ॥
मौनी वद्धासनो ज्ञानी ध्यानी निश्चलविग्रहे ॥ अनाहतविशुद्धाज्ञाभेद
यित्वा यथाक्रमं ॥ स्वशानीराद्धिनिर्गत्य सत्वमन्त्रबोर्द्धमार्गतः ॥ ततो ना

२

स०

॥२॥

दृंसमुन्नीर्य्य स्थित्वा स्वकरसम्पुटे ॥ शोधयेत्पंचभूतानि ज्ञात्वा वर्णौ क्र
मैः पृथक् ॥ पृथिव्यापोनलो वायुः सभूतानामयं क्रमः ॥ पृथ्वी पीता सि
ता वारि रक्तवर्णो हुताशनः ॥ तेषां कृष्णतरो वायुराकाशं निर्म्मलं सदा ॥ म
नसा शोधयेद्बुद्धिं बुद्ध्या संशोधयेन्मनः ॥ तद्द्वयं परमं शुद्धमात्मना सम्य
गीनितं ॥ स्वदेहं ब्रह्ममार्गेण योगयुक्त्या समाविशेत् ॥ सुषुम्नास्थानमाश्रि
त्य तिष्ठमानमनाहते ॥ आदौ संशोधयेत्पृथ्वीं शोषदाहप्लवामृतैः ॥ पुनर्वा
रि पुनस्तेजः पुनर्वायुं च पावयेत् ॥ बीजैश्चतुर्विधैर्वायोरग्नेर्वरुणशक्र
योः ॥ यमिमं शोषकं बीजं रमिदं दाहकं महत् ॥ वमाप्लावनबीजं च वमि
रमृतात्मकं ॥ एवं शुद्धानि भूतानि भवन्ति नृपनन्दन ॥ व्योम्नि संशोधनं ॥२॥
नास्ति यतस्तं निर्म्मलं सदा ॥ कालालये स्वके देहे प्रविश्यात्मनि शोधनं ॥ २०।

कर्त्तव्यंयोगमाश्रित्यसर्व्वकामविवर्ज्जिते ॥ भूतशुद्धिमिमांकृत्वायःकुर्य्या
च्चण्डिकार्च्चनं ॥ तस्याचिरेणकालेनमहालक्ष्मीःप्रसीदति ॥ ॥ अथमु
नियातन्त्रे ॥ त्रिकोणंचैवषट्कोणंवृत्तंवसुदलंपुनः ॥ वृत्तंदिग्द्वारसंयुक्तं
त्यपुनंचसमालिखेत ॥ ऊर्ध्वैकादशभिन्यासमाद्यावेमातृकादयः ॥
मनुतन्त्रे ॥ ब्रह्माविष्णुमहेशास्तुमुनयास्युःप्रकीर्त्तिताः ॥ गायत्र्युष्णिग
नुष्टुप्छन्दत्रयमुदीरितं ॥ देव्यास्यतुमहाकालीमहालक्ष्मीसरस्वती ॥
नन्दाशाकम्भरीभीमाशक्तित्रयमुदाहृतं ॥ तिस्रोस्यशक्तयोदुर्गाभ्राम
रीनक्तदन्तिका ॥ अग्निवायुंभशास्तत्त्वंप्राग्वदूध्यादिकंन्यसेत ॥ सुरयःश
क्तिबीजानितत्वानिहृदयेपुनः ॥ ततएकादशन्यासान्कुर्व्वीतेष्टफलप्रदा
न् ॥ प्रथमंमातृकान्यासंप्राक्प्रोक्तंतुसमाचरेत ॥ कृतेनयेनदेवस्यसानू

पंयातिमानवः॥ अथद्वितीयकुर्वीतन्यासंसारस्वताभिधं॥ वीजत्र-
यंतुमन्त्राद्यंतारादिहृदयान्तकं॥ षडुद्धरो भवेन्मन्त्रो नवस्थानेषु वि-
न्यसेत॥ कनिष्ठानामिकामध्यातर्ज्जन्यंगुष्ठयुग्मके॥ करमध्येहस्त-
पृष्ठेमणिवन्धेचकूर्प्परे॥ हृदयादिषडङ्गेषुजातियुक्तंपुनर्न्यसेत॥ अस्मि-
न्सारस्वतेन्यासेकृतेजाड्यंविनश्यति॥ न्यासाःकार्य्याःसप्तशत्याःपाठे
कामा[illegible]शेषतः॥ ततस्तृतीयंकुर्वीतन्यासंमातृगणादिकं॥ मायावी-
जादिकाब्राह्मीपूर्वतःपातुमांसदा॥ माहेश्वरीतथाग्नेयांकौमारीदक्षि-
णेवतु॥ वैष्णवीपातुकाष्ठायांवाराहीपश्चिमेवतु॥ इन्द्राणीपावकेकोणे
चामुण्डाचोत्तरेवतु॥ ऐशानेतुमहालक्ष्मीऊर्द्ध्वंव्योमेश्वरीतथा॥ सप्तद्वीपेश्व-
रीभूमौरक्षाकामेश्वरीतले॥ तृतीयेस्मिन्कृतेन्यासेत्रैलोक्यविजयीभवे-
त॥ न्यासंचतुर्थंकुर्वीतनन्दजादिसमन्वितं॥ नन्दजापातुपूर्वाङ्गंकमलां

स०

॥८॥

॥८॥

262

कुशमण्डिता ॥ खड्गपात्रकरापातु दक्षिणे नक्तदन्तिका ॥ पृष्ठे शाकम्भरीपा
तुपुष्पपल्लवसंयुता ॥ धनुर्बाणकरादुर्गावामेपातुसदैव मां ॥ शिरःपातु
कराभीमा मस्तकाचरणावधि ॥ पादादिमस्तकं यावद्भ्रामरीचित्रकान्तिभृ
त् ॥ तुर्य्यंन्यासंनरः कुर्वञ्जरामृत्युंव्यपोहति ॥ ब्रह्माद्यमथकुर्वीतन्यासंपं
चममुत्तमं ॥ पादादिनाभिपर्य्यन्तं ब्रह्मापातु सनातनः ॥ नाभेर्विशुद्धपर्य्यन्तं
पातु नित्यंजनार्द्दनः ॥ विशुद्धेब्रह्मरन्ध्रान्तं पातु रुद्रस्त्रिलोचनः ॥ हंसः पातु
पदद्वन्द्वं वैनतेजः करद्वयं ॥ चक्षुषी वृषभः पातु सर्वाङ्गानि गजाननः ॥ प
रापरौ देहभागौ पात्वानन्दमयो हरिः ॥ कृतेस्मिन्पंचमेन्यासे सर्वान्कामा
नवाप्नुयात् ॥ षष्ठंन्यासं ततः कुर्य्यात्महालक्ष्म्यादिसंयुतं ॥ मध्यंपातु महाल
क्ष्मीरष्टादशभुजान्विता ॥ उर्द्ध्वंसरस्वतीपातु भुजेरष्टाभिरूर्जिता ॥ अधःपा
तु महाकाली दशबाहुसमन्विता ॥ सिंहो हस्तद्वयेपातुपरहंसाक्षियुग्मकं ॥

२

१०

॥ २ ॥

माहिषंदिव्यमार्कण्डेयस्तः पातुपदद्वयं ॥ महिषघ्नचण्डिकायुक्तः सर्वा
ङ्गंनिममावतु ॥ यस्मिन्विहितेन्यासे सद्गतिं प्राप्नुयान्नरः ॥ मूलाक्ष
रैन्यासरूपं ततः कु[illegible]र्वीतसप्तमं ॥ ब्रह्मरन्ध्रेनेत्रयुगे श्रुत्योर्नासिक
योर्मुखे ॥ पायौमूलमनोर्वर्णास्तावधान्नमसान्वितान् ॥ विन्यसेत्सप्तमे
न्यासे कृते रोगक्षयो भवेत् ॥ पायुतो ब्रह्मरन्ध्रान्तं पुनस्तानेव विन्यसेत् ॥
कृतेस्मिन्नष्टमे न्यासे सर्वदुःखं विनश्यति ॥ कुर्वीत नवमे न्यासं मंत्रव्याप्ति
स्वरूपकं ॥ मस्तकाच्चरणं यावच्चरणान्मस्तकावधि ॥ पुनोदक्षे पृष्ठदेशा ॥ २ ॥
वामभागे हृशो न्यसेत् ॥ मूलमंत्रकृते न्यासे नवमो देवताप्तिकृत् ॥ ततः
कुर्वीत दशमं षडङ्गन्यासमुत्तमं ॥ मूलमंत्रं जाजियुक्तं हृदयादिषु विन्यसे
त् ॥ कृतेस्मिन्दशमे न्यासे त्रैलोक्यवशमानयेत् ॥ चण्डिकापाठकर्तव्या न्यासाः

२६५

स्वेष्टप्रदायका ॥ दद्यो न्यासो न्न फुलेदं कुर्य्याद्द्काद्यंततः ॥ खड्गिनी शूलि
नीत्यादि पठित्वा श्लोकपंचकं ॥ आद्यं हस्ततरंवीजंध्यात्वा - - - सर्व्वाङ्गे केन्य
सेत् ॥ मूलेन पाहि नो देवीत्यादि श्लोकचतुष्टयं ॥ पठित्वास्त्र्य्य सद्द शद्वि
तीयं पृष्ठतो न्यसेत् ॥ ततः षडङ्गं कुर्व्वीत विभक्तैर्मूलवर्ण्णकैः ॥ एकेनैकेन
द्विकेन चतुर्भिर्य्युग्मकेन च ॥ समस्तेनैव मन्त्रेण कुर्य्या[illegible]द्दङ्गानि षट्क्र
मात् ॥ शिखायां नेत्रयोः श्रुत्योर्न्नसोर्व्वक्त्रे गुदे न्यसेत् ॥ मंत्रवर्ण्णान् समस्तेन
व्यापकं त[illegible]ष्टं शस्त्रेत ॥ ॥ शंभुनित्यातन्त्रे ॥ एते न्यासाः प्रकर्त्तव्याः चण्डी
सप्तशती जपेत् ॥ एवं न्यासविधिं कृत्वा सष्ठिमुद्रां विलोकयेत् ॥ तस्या विलो
कनेनाजनं कृतं न्यासः स्थिरो भवेत् ॥

पात्रेबिंञति पूजार्थे द्रव्याणि नवदीजतः ॥ इदथन्यासैः कृतैर्यैर्यत्नप
कर्तीफलंलभेत ॥ तत्फलंलभतेसत्यंतस्मिन्नेकादशेकृते ॥ तलपृष्टे
द्रवांमुद्रांदत्वास्त्रेणावगुण्ठयेत् ॥ अर्घपात्रंप्रतिस्थाप्य पूरयेत्कुद्रवारि
णा ॥ गन्धपुष्पाक्षतान्तत्रविन्यसेन्नूपनन्दन ॥ ध्यात्वासर्वाणितीर्थाणि
हस्तौदत्वाभिमन्त्रयेत ॥ रक्षार्थंतस्यकर्त्तव्यंचक्रामृतद्वात्रसंयुता ॥ अ
र्घोदकेनसंस्कारंपूजाद्रव्यस्यपूर्ववत् ॥ कृत्वालोमविलोमाभ्यांत्रात्म
नंसम्यगर्चयेत ॥ प्रत्यर्घंसंप्रतिस्थाप्यमध्येपीठार्घपात्रयोः ॥ षट्कोण
चक्रमध्यस्थामम्बवीजेव्यवस्थितां ॥ ॥ मार्कण्डेयपुराणे ॥ महाका
ल्यासमत्रस्वत्यालंकृतंदक्षिणान्ययोः ॥ संयुक्तादक्षिणेवामेसिंहेनमहि
षेनच ॥ अष्टादशभुजांध्यात्वामहालक्ष्मीप्रणम्यच ॥ ॥ मेरुतन्त्रे ॥ ततो
देवीत्रयंध्यायेत्कालिकाध्यानमुच्यते ॥ दशास्यांदशपादांचदशहस्तां

विधिस्तुतां ॥ इन्द्रनीलद्युतिं खड्गं चक्रं शंखं शिनः शनान् । दक्षहस्तेषु द
धतीं गदां शूलं भुशुण्डिकां ॥ परिघांस्त्रधनुर्वामैर्दधतीं ब्रह्मसंस्तुतां ॥
मधुकैटभनाशार्थं सालंकारां त्रिवीकृतां ॥ ततो ध्यायेन्महालक्ष्मी
महिषासुरमर्द्दिनीं ॥ समस्तदेवतातेजातांपद्मासनस्थितां ॥ अष्टादश
भुजामक्षमालांपद्मंच शायका ॥ खड्गं चक्रं गदावज्रं दक्षहस्तेः कमण्डलुं ॥
शंखं च दधतीं वामेः शक्तिं चापं शरं धनुः ॥ चर्म्म दण्डो सुरापात्रं घण्टापा
शं त्रिशूलकं ॥ सरस्वतीं ततो ध्यात्वौं येत्शान चन्द्रसमप्रभां ॥ शंखं च मुश
लं चक्रं बाणां दक्षेषु विभ्रती ॥ घण्टां शूलं ह[illegible] चापं वामहस्तेषु विभ्रती लं २
गौरीदेहसमुद्भूतानन्दणमानन्ददायिनी ॥ आधारभूता जगतः शुम्भादि
कविमर्द्दिनी ॥ अभिध्यात्रीत्तृतीयस्य चरित्रस्य स्मरेत्सदा ॥ इतिध्याना ॥

सतूनित्यातन्त्रे॥ पीठानां पूजनं कृत्वा स्ववीजेन पृथक् पृथक्॥ ॐकारविन्दु
मध्यस्थं नाम ध्यायाद्यमकृतं॥ देवतानां स्ववीजं च पूजायां ऋद्धिसिद्धिदं॥
ॐकारं प्रथमं पीठं पूर्णपीठं ततः परं॥ तृतीयं कामपीठं च पूजयेल्ली
प्रदायच॥ पूर्वादिदिक्षु पीठस्य गणेशादि चतुष्टयं॥ गणेशः क्षेत्रपालो
॥१२॥ वपादुको वटुकाम्बिया॥ आग्नेयादि चतुर्दिक्षु पूज्यं देवीचतुष्टयं॥ आ
द्यात्र जया प्रोक्ता द्वितीया वीजमास्मिता॥ जयन्ती तत्परे देवि चतुर्थी चाप
राजिता॥ पूज्या नामपदैर्देव्याः पीठपङ्कजमध्यगाः॥ प्रागादिक्रमयोगेन ॥११॥
पंचषट्पंचसप्त च॥ प्रथमा विष्णुमाया च द्वितीया चेतनास्मृता॥ बुद्धिनि
द्रा क्षुधा छाया शक्तिस्तृष्णाष्टमी [illegible]॥ ततः॥ कान्तिर्जातिस्ततो लज्जा शा
न्तिः श्रद्धा त्रयोदशी॥ कीर्त्तिर्लक्ष्मी धृतिर्मेधा स्मृतिरेव दया तथा॥ तुष्टिः पु
ष्टिश्च माता च भ्रान्तिर्नामपदक्रमात्॥ त्रयोविंशतिसंख्येयं ब्रह्मणा पूजिता सुराः॥

मेसतंने॥ अथतद्वासेपंचविंशद्दलेन्यसेत॥ विष्णुमायांचेतनांचबुद्धि
निद्रांक्षुधांतथा॥ छायांशक्तिपरांतृष्णांकान्तिंजातिंतदुत्तरं॥ लज्जांशा
न्तिंतथाश्रद्धांकीर्त्तिलक्ष्मींधृतिंतथा॥ वृत्तिंश्रुतिंस्मृतिंचापिदयांतुष्टिं
ततःपरं॥ पुष्टिंचमातरंभ्रान्तिमर्च्चयेदितिपंचविंशत्रयोविंशयो
र्विकल्पः॥ ॥हाडिमते॥ नालमूलेचसंपूज्यमाधारादिचतुष्टयं॥ आ
धानंकूर्मसन्थोचचतुर्थीपृथिवीनृप॥ ततोनालसुमध्येपद्मे
पूज्ययत्नेतः॥ ज्ञानात्मतसुत्पन्नात्मामण्डलार्चनमालंभेत॥ अघोर
वादिनालिंच्यमण्डलंसोम्यदृष्टिमान्॥ पूर्वपत्रादितःपूज्यमातृकां
मण्डलेंशिवं॥ नहस्यकथितेर्वीजैःस्ववीजेनतथापृथक्॥ आद्यपत्रे
ससभ्यर्च्यचब्रह्माणींहंशवाहनां॥ माहेश्वरींवृषारूढांपूज्यासाहतमु
ग्दले॥ मयूरवाहनेपूज्याकौमारीदक्षिणदले॥ नैर्ऋत्येवैष्णवीपूज्या

१२

गरुडोपरिसंस्थिता॥पश्चिमेयज्ञवाराहीदंष्ट्राढ्यातवसुन्धना॥समीरण
दलेतोस्मानारसिंहीघनस्वना॥गजराजसमारूढापूर्व्वेन्द्रीसोमदिग्द
म० लगतानाथपवीवानासदारुद्रेणसंयुता॥ईशपत्रेसमभ्यर्च्यचामुण्डा
मुण्डमण्डिता॥ब्रह्माणीकर्णिकामध्येक्रमात्वष्टकोणपूजने॥नन्दजाहेमगर्भा
॥५२॥ भासुरक्तानक्तरक्तिका॥नीलाशाकम्भरीदुर्गासर्वदुर्गतिहाविली॥द
क्षाक्षितिमुखीभीमानीलपत्रेक्षिनोधना॥तेजोमण्डलदुर्दर्षाभ्रामरीव
नदार्चिता॥प्रथमबीजेमहाकालीध्यानपूर्वंसमर्च्चयेत्॥द्वितीयबीजेनपू
र्वं महालक्ष्मीप्रपूजयेत्॥तृतीयेष्टभुजांध्यात्वासमभ्यर्च्यसरस्वती॥ततः ॥५२॥
पृथक्पृथक्[illegible]पूजांकृत्वामहिषसिंहयोः॥मध्यबीजेचिरंध्यात्वामहा २८
लक्ष्मीस्यानिधिं॥आह्वानपूर्वकंदद्यादासनंमणिभूषितं॥मण्डलस्यातु

यादेवीपीठस्यासर्वशक्ति[illegible]या॥ महालक्ष्म्यासौहेकौनचिन्तयेद्योगमुद्रया॥ प्रकाद्दो
तं महालक्ष्म्याः स्वरूपध्यात्वावाहनादिकं॥ मुद्रायुग्मभुजाकाराचाण्डिकाग्रेप्रदर्शये
त्॥ श्रुष्टाहृद्दलमालाद्याः ततः पाद्यप्रकल्पयेत्॥ वलिपुष्पादीतोरणाच्च न्दनैरर्घ्यप्र
कल्पितं॥ अर्घं दत्वा महालक्ष्म्यै धेनुमुद्रां प्रदर्शयेत्॥ संकल्याचमनं देवी स्नानपुष्पा
भिषेचनं॥ विदध्याद्धेनुमुद्रां यथा माता प्रतुष्यति॥ महार्हेचित्रितवासः विचित्रा
भरणानि च॥ कस्तूरीकुंकुमोपेतं कर्पूरागुरुचन्दनं॥ सुरभीणि सुपुष्पाणि बिल्व
पत्राक्षतानि च॥ नैवेद्यं चण्डिकादेव्यै दिव्यं धूपश्च धूपितः॥ ज्वलन्मणिशिखाकार
दीपैर्नीराजनैः शुभैः॥ यथावर्णक्रमोपेतं नैवेद्यं पायसादिभिः॥ अनेकनैस
पक्वान्नैर्महालक्ष्मीप्रतोषयेत्॥ प्रणम्याचमनं दत्वा चन्दनं मुखवासनं॥ सकर्पू
रं वृताम्बूलं भक्तिभावसमन्वितं॥ दिग्गीशानिसमभ्यर्च्य तदस्त्राणि यथाक्रमं॥ ॥
मार्क्कण्डेयपुराणे॥ प्राणान्निनस्यपूर्वोक्तान्यासान्संस्मृत्यनात्मवान्॥ प्रथमंचरि

२२

तं प्रोक्तं मधुकैटभनाशनं ॥ महिषासुरानिर्नाशं चरितं विद्धि मध्यमं ॥
चरितं मध्यमं विद्धि निशुम्भादिवधान्वितं ॥ चरितानि जपेद्धीमान्सरहस्यं
स० विशेषतः ॥ पुस्तकेवां चरितं मध्यमं चैवा जपेद्वा चण्डिकामयी ॥ ॥अथ
पाठनियमः ॥ ॥वाराहीतन्त्रे ॥ आधारे स्थापयित्वा तु पुस्तकं वाचयेत्स्फुटं ॥
हस्तसंस्थापनाद्देवि· हरत्यर्द्धफलं यतः ॥ यावन्न पूर्यते ध्याय· तावन्नावि
॥१२॥ रमेत्सुधीः ॥ अनुक्रमं पठेद्देवि· छिन्नः कस्माद्दिकं त्यजेत् ॥ गातीशीघ्रीशिरः
कम्पी यथा लिखितपाठकः ॥ अनर्थज्ञोल्पबुद्धिश्च षडेते पाठकाधमाः ॥ माधु
र्यमक्षरव्यक्तिः परिच्छेदस्तु सुस्वरः ॥ सानुस्वानी च दीर्घी च षडेते पाठकाशुभाः ॥
प्रस्यदादध्यायमध्ये विश्रामोन्तरतः प्रियो ॥ पुनरध्यायमावर्त्य पठेत्सर्वंस्त ॥१३॥
वेविधिः ॥ ॥अथमन्त्रस्यसूक्ते ॥ शुद्धेनाचलचित्तेन पठितव्यं प्रयत्नतः ॥ न मान २८४
सं पठेत्स्तोत्रं वाचिके तस्य शस्यते ॥ पुस्तकं पावनं श्रेष्ठं सहस्रं वाचकं यदि ॥ आ

नेन स्तु भवेद्वस्तुवाचिकं पुस्तकं विना ॥ आधाने स्थापयित्वा तु पुस्तकं प्र
जपेत्सुधीः ॥ रुत्नसंस्थापना हेवि· यस्माद्दल्पफलं भवेत् ॥ तत्स्वयं लिखि
तं यद्वु· हृतिना लिखितं भवेत् ॥ अब्राह्मणेन लिखितं· तत्सर्वं विफलं भवेत् ॥
न स्वयं च कृतं स्तोत्रं· मन्यथा विकृते न च ॥ यस्मात्कलौ न प्रशस्तं· मृषिभिर्भा
षितं पठेत् ॥ अबिहृद्रादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः ॥ स्तोत्रेण दृश्यते

स्तत्र· प्रभवेत्तु समाचरेत् ॥ भीष्मपर्वणि गीता· सुपर्णस्ताकलौ मतं ॥ विष्णोः
सहस्रनामाख्यं स्तोत्रं पापप्रणाशनं ॥ गजेन्द्रमोक्षणं चैव· कानुरूपस्तवमे
वच ॥ नरसिंहस्तथा स्तोत्रं· श्रीनामसमसंयुतं ॥ देव्याः सप्तशतीस्तोत्रं· तथा ना
मसहस्रकं ॥ स्तो काष्टकं नीलकण्ठ· शैवनामसहस्रकं ॥ त्रिपुरायाप्रसादाख्य
सूर्यस्य स्तवराजकं ॥ पैत्रोनुचिस्तवो यद्वा· ईन्द्राक्षीस्तोत्रमेव च ॥ वेदे वेच महा
लक्ष्म्याः स्तोत्रमिन्द्रेण भाषितं ॥ भार्गवाख्येन रामेन· सप्तान्यन्यानि कारणात् ॥

१४ इत्युक्तापार्व्वतीनाथ· सप्तशत्यामहाफलं॥तस्यश्रवणमात्रेण सर्व्वरोग
प्रशान्तये॥ ॥वाराहीतंत्रे॥नातःपरतरं किंचित्स्तोत्रमस्तिवरानने॥
सं० भुक्तिमुक्तिप्रदंपुण्यं·पावनानांचपावनं॥ ॥इतिनवमीसिंहकृतायांच
ण्डीभक्तविनोदिन्यांप्रथमःपटलः॥ ॥अथपाठक्रमोयथा॥ ॥हाडि
।१२४। मते॥अर्गलंकीलकंचादौ·पठित्वाकवचंपठेत॥अर्गलंहृदयेयस्यत १४
थानर्गलवानसि॥कीलकंहृदयेयस्यसकीलितमनोरथः॥कवचं
१५ हृदयेयस्यसवज्रकवचीसुखी॥ ॥प्रथमेअर्गलास्तोत्रपाठततः ॥१२४॥
कीलकं॥तत्पश्चात्सप्तशतीपाठंकुर्य्यात्पूर्व्वोक्तविधियुक्तायांपठे
त॥श्रीशाके१६७२ सम्वत१८०७ कार्त्तिकपूर्णमास्यायांलिखितंवंश 26.8
१४ मणिवृद्धेनशुद्धंवाअशुद्धंमयायथादृष्टंतथालिखितंममदोषोनदीयते॥ १५

॥२ अमिलानतु॥ मार्कण्डे पुराणोक्तं नित्यं चण्डिस्तवं अयं पठेत॥ ज
पं विनो भवेच्चण्डी वरदा तस्य सर्वदा॥१॥ पुटितं मूल मंत्रेण जपन्ना
प्नोति वांछितं॥ शतमादौ शतं चान्ते जपेन्मत्रं नवाक्षरं॥ ॥सप्तश
ती कल्पे॥ ऋषिरुवाच॥ नित्यं चाद्यादि जाप्यस्य विधानं ते वदाम्यहं॥
क्रमेण सर्वकार्य्याणां सिद्धये यज्ञपुण्यदं॥ पूर्वोक्तेन विधानेन कृत्वा
तु तर्प्पणादिकं॥ शुक्लभूतामवष्टभ्य मास प्रतिदिनं जपेत॥ सहस्र
स्य संयुक्तं चण्डिकाचवितत्रयं॥ दशांश होम सहितं तोष्यन्ते नित्यच
ण्डिकां॥ नवाक्षरेण मन्त्रेण स्मार्त्तोग्नौ नृपनन्दन॥ नमो देव्यै महादेव्यै
शिवायै सततं नमः॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताः॥ अने
न श्लोकपाठेन जुहुयाद्धा शुभं हविः॥ उध्वृताः प्राक्रणो मंत्रैपीना[illegible]

त: समुज्वल: ॥ संस्कृतायां भुवि स्थाप्य स्मार्त्तोग्निः संप्रकीर्त्तितः ॥ दे
वताह्वनि जाप्यस्य होमे भूः संस्कृतोन्यथा ॥ कृत्वा संस्थापयेदग्निनास्ये
स० शासादनं मतं ॥ स्मार्त्ते हि पायसं होमे हुते स्मार्त्ते हुताशने ॥ तदभावे स
मित्सर्पिस्तिलानां हवनं भवेत् ॥ होमयेत्तु महालक्ष्म्या ऋतुकालेयदु
॥२५॥ द्भवा ॥ ॥मेरुतन्त्रे ॥ पायसान्नैस्तिमध्वक्तैर्दोहारस्राफलैरपि ॥ मातुलु
ङ्गैरिक्षुखण्डैर्नारिकेलफलैस्तिलैः ॥ जातीफलैराम्रफलैरन्यैर्मधुरवस्तु
भिः ॥ सप्तशत्या दशावृत्त्या प्रतिश्लोकं हुतं चरेत् ॥ अयुतं च नवार्णेन स्थापिते ॥२५॥
ग्नौ विधानतः ॥ ॥हाडिमते ॥ सजपं होमनैवेद्यं महालक्ष्मीप्रणम्य च ॥
शूलेन पाहि नो देवी शतश्लोकैः प्रदक्षिणं ॥ विदध्यात्तु स्थितो भूत्वा चण्डि 269
काध्यानतत्परः ॥ नमो देव्या इति श्लोकैः पठेत्संभ्रमवर्जितः ॥ कृत्वा

पंचनमस्कारान्नुपविश्यासने शुभे ॥ सर्व्वस्वत्र्यपेइत्याहिदिङ्भिः श्लो
कैः कृतांजलिः ॥ कृत्वाचरणादेवानां होमंतन्नामसंयतः ॥ कृत्वापूर्णा
हुतिं सम्यग्देवमग्निंविसृज्य च ॥ स्वधारीरे समारोप्यदत्वा तस्यैविसर्ज्जन ॥
प्रार्थयेज्जगतां धात्रीं प्रणतास्य हृदि स्थितां ॥ अनेनविधिना भूपयः कु
र्य्या। व्रीडिकार्च्चनं ॥ तस्यतु श्यामहालक्ष्मीर्य्यं ददाति श्रणुषेत ॥ म
हदेश्वर्य्यमतुलं त्रैलोक्यंतस्यजायते ॥ धर्म्मराज्यसमायुक्तं पुत्रपौत्रसम
न्वितं ॥ तं करोति महालक्ष्मी व्रुह्मविष्णुशिवोपमं ॥ रिपवः संक्षयं यान्ति
कस्या ग्रहवीजनं ॥ विष्णुलोके भुक्तिं विष्णुरनुरस्तु लभे ॥ तत्सर्व्वंतस
मायांति महालक्ष्मीप्रसादतः ॥ ॥ वाराहीतंत्रे ॥ अतः परतृरंकिंचित्तेनोच
मस्ति वरानने ॥ भुक्तिमुक्तिः प्रदं पुण्यं पावनानां च पावनं ॥ ॥ इति नवमी
सिंहहृत्तायांवल्लीमन्तविधानोदिन्यांपाठविधानंनाम द्वितीयः पटलः ॥ ॥

अथपुरश्चरणं ॥ वायवीयसंहितायां ॥ जीवहीनो यथा देही सर्वकर्म्मसु नक्ष-
मः । पुरश्चरणहीनोपि तथा मंत्रः प्रकीर्त्तितः ॥ ॥ वीरचूडामणौ ॥ पुरश्चर-
स० णहीनस्य मंत्रसिद्धिर्न्नजायते ॥ आदौ पुरस्क्रियां कुर्य्यान्नियमेन यथावि-
धि ॥ ॥ मेरुतंत्रे ॥ वराहीं ध्यात्वा जपेल्लक्षं चतुष्कं तद्दशांशतः ॥ पायसान्नेव
॥१६॥ हुत्वा संपूजिते हेमनेत सि ॥ तर्पणमार्जनं ब्राह्मणभोजनं तु सर्वसाधारणं ॥
॥ ॥ तद्वक्ष्याडी पा० कूपपुरश्चरणं ॥ तदुक्तं मरीचकल्पे ॥ सप्रसस्या विधान-
स्य पुरश्चरणपूर्वकं ॥ योगाद्य विविधान्वक्ष्ये सर्वार्थस्य [illegible] साधकान् ॥
कृष्णाष्टमी समारभ्य यावत्कृष्णचतुर्दशी ॥ जपेदेकोत्तरावृत्ति देवीसूक्तं च
पूर्वकं ॥ रात्रीसूक्तं जपेदादौ मध्ये सप्तसतीस्तवं ॥ प्रान्ते देव्याथसूक्तं च पो- १६
रश्च[illegible]क्रमः ॥ तद्दते हवनं कृत्वा प्रतिश्लोकेन पायसं ॥ रात्रिसूक्तं प्राग- 270
न्ते चं तथा ॥ देव्याथसूक्तकं हुत्वान्ते सिद्धयः स्तोत्रं आदौ पूजादिकं तु ने ॥
रिा२

सौवर्णीप्रतिमांदेव्याःकारयेल्लिङ्कमानतः॥यन्त्रंवाकारयेन्मन्त्री
तदर्द्धंनाभिशक्तितः॥मण्डलेसर्वतोभद्रेषट्कोणेंकितकर्णिके॥व
र्त्तमानेनविधिनापीठंदेव्याःप्रपूजयेत॥जयाख्याविजयाभद्रा·भद्रकाली
ततःपरं॥सुमुखीदुर्मुखीसंज्ञायश्वाह्याघ्रमुखीतथा॥अथासिंहमुखीदु
र्गानवशक्तीःप्रपूजयेत॥स्वस्वमन्त्रेणविधिनापूजयेतयथाक्रमं॥आस
नेमूलमन्त्रेणदद्याद्धृत्केनसाधकः॥मूर्त्तिंमूलेवसंकल्प्यतस्यामावाह्यप्रज
जयेत॥सम्पूज्यविधिवत्पूज्यामुपचारादिकाःक्रमात॥मातृकाकण्ठशक्ति
श्चपूजयेद्विधिपूर्वकं॥नैवेद्यान्तंसमभ्यर्च्यततोध्यानंसमाचरेत॥मन्त्रेणनव
दुर्गायाअष्टावाजातवेदसे॥नवारूर्य्यांपठवामन्त्रौदुर्गामंत्रंप्रसप्तले॥इदंस्त
वंजपेद्देव्याःसिद्धिदंस्तुमनुत्तमं॥ ॥इतिचण्डीपाठपुरश्चरणं॥ ॥अथावृत्तिफलं॥
वाराहीतन्त्रे॥ ॥चण्डिपाठफलंदेविशृणुष्वगदतोमम॥एकावृत्त्यादिपाठानीय

२७

यथावत्कथयामिते॥संकल्पपूर्वंसंपूज्यन्यस्याङ्गेषुमनुन्सकृत्॥उपस
र्गोपशान्त्यर्थंत्रिरावृत्तिंपठेन्नरः॥ग्रहोपशान्त्यैकर्त्तव्यंपंचावृत्तिंवरानने॥
स० महाभयेसमुत्पन्नेसप्तावृत्तिमुदीरयेत्॥नवावृत्त्यांभवेच्छान्तिर्वाजपेयफलं
लभेत्॥राजवश्यायभूत्यैचरुद्रावृत्तिमुदीरयेत्॥अर्कावृत्तिःकामसिद्धै
वैरिहानिश्चजायते॥मन्वावृत्त्यारिपोर्वश्यंतथास्त्रीवश्यतामियात्॥सौ
॥२७॥ ख्यंपंचदशावृत्त्याश्रीयमाप्नोतिमानवः॥कलावृत्त्यापुत्रपौत्रधनधा
न्यागमंविदुः॥राजभीतिविनाशायवैरस्योच्चाटनायच॥कुर्यात्सप्तदशा
वृत्तिंयथाष्टादशकंप्रिये॥महाव्रणविमोक्षायविंशावृत्तिंपठेन्नरः॥पंच ॥२७॥
विंशावृत्तिनाश्चभवेद्बन्धविमोक्षणं॥संकटेसमनुप्राप्तेदुश्चिकित्सामयेसदा॥ २७
जातिध्वंसेकुलच्छेदेआयुषोनाशमागते॥वैरिवृद्धौव्याधिवृद्धौधननाशे
तथाक्षये॥तथैवत्रिविधोत्पातेतथाचैवातिपातके॥कुर्याद्यत्नाच्छतावृत्तिं

तःसंपद्यतेशुभ॥जयवृद्धेःशतावृत्त्यानाऽस्यवृद्धेःसदापठेत्॥म
नसाचिन्तितंदेविसिद्धेदश्वोत्तराष्ठतान्॥शतान्यश्वमेधयज्ञानांफ
लंप्राप्नोतिसुव्रते॥सहस्रावर्त्तनाल्लक्ष्मीमातनोतिस्वयंस्थिरा॥
मुक्षाकामीयथाकामान्नरोमोक्षमवाप्नुयात्॥यथाश्वमेधःक्र
तुषुदेवानांवयथाहरिः॥स्तवानामपिसर्व्वेषांतथासप्तशतीस्त
वः॥ ॥दक्षिणाव्यवस्थोक्ताहरगौरीसम्वादे॥पंचस्वर्णाःशता
वृत्तेयद्वावृत्तेतुतत्त्रयं॥पंचावृत्तेस्वर्णमेकंत्र्यावृत्तेतदर्द्धकं॥एका
वृत्तेपादमेकंदद्याद्दाशक्तितोबुधः॥ ॥अथकाम्यानिमार्कण्डेयपु
राणे॥तुष्टिपुष्टिसुकीर्त्तिनांसिद्धयःसर्व्वकर्म्मणां॥यथाध्यानंत
थाकुर्यात्जनेजपकर्म्मणि॥वृद्धीनांदेवताद्धीनांप्राप्तयेशुभकर्म्मणि॥

१८

स०

शुद्धस्फटिकसंकाशं ध्यानं स्यात्पूजनं मतं ॥ वश्ये -नतरं ध्यायेत्कर्ष
णे हर्षवेगयोः ॥ धूम्रमुच्चाटने मेवुकृष्णं ध्यानं चे मारणे ॥ नीलोत्प
दलश्यामं ध्यात्वा भवति सुप्रजा ॥ सर्व्वरत्ननिभाकारं ध्यात्वा निश्चल
मानसः ॥ सर्व्वान्कामानवाप्नोति क्षुवमुक्तं मया तव ॥ कल्याणाग्निस
॥२८॥ मं पुष्टे ध्यानं प्रोक्तं स्वयम्भुवा ॥ महारोगसमायुक्तो ध्यानं वाभिभयेकुर्वं ॥
पीयूषवर्णसंयुक्तं पूर्णचन्द्रसमप्रभं ॥ ध्यानं कृत्वा लभेत्सत्य शीघ्रं सर्वा
न्मनोरथान् ॥ चतुरस्रेषु शान्त्यादौ पीठे पूजा महाफलं ॥ वश्यादौ वर्त्तुलं त
हृर्द्धचन्द्रे सुखोषकः ॥ त्रिकोणे वा विशुद्धा सा पद्मकोणेथवा भवेत् ॥ पद्मोणे ॥२८॥
पीठपूजायां निल्मयतान्कुलं डवेत् ॥ खण्डेनादोन विमिते पीठे या पूजन
क्रिया ॥ विघ्नयति शत्रुणां सह्यनात्रान्मे नासिवे ॥ ॥ हरगौरीसंवादे ॥

२७२

श्रीकामः पुत्रकामो वा सृष्टिमार्गक्रमेण च ॥ जपेच्छक्रादिमारभ्य शुम्भ
दैत्यवधावधि ॥ आदिमारभ्य प्रजपेत्पश्चाद्धयं समापयेत् ॥ शान्त्यादिका
मं सर्वत्र स्थितिमार्गक्रमेण तु ॥ सावर्णिः सूर्यतनयः सावर्णिर्भविता मनुः ॥
संहात्वेवाद्यमारभ्य पश्चादादिं समापयेत् ॥ ॥ मनुतन्त्रे ॥ तन्त्रादिमं चरित्रं
तु रोगनाशाय याजपेत् ॥ उपसर्गविनाशाय मध्यमीयो जपेद्बुधः ॥
अन्त्यं विषयकामस्तु चरित्रं परिशीलयेत् ॥ चरित्रद्वयशीलस्य
न वंशः छिद्यते क्वचित् ॥ पठेद्वाद्यास्तु चरिते विपत्तिस्तस्य नश्यति ॥
आद्यन्तं पठते यस्तु मानयेदविराद्विपून् ॥ स्वशत्रून् दैत्यभावेन स्वमि
त्रान् देवताधिया ॥ भावयेद्यो जपेच्चण्डीं त्रिसन्ध्यं मासमात्रकं ॥ मृता
वा मृतकल्पा वा शत्रवः स्युर्न संशयः ॥ स्वार्थानुसारी पद्यं च सप्त

१२

ज्ञात्वातुयोजपेत्॥यस्तन्मन्त्रेणपुटितंतत्स्तौकसंख्यया॥प
ठेच्चण्डींतथाद्यन्तेसकामस्तस्यसिद्ध्यति॥ ॥अथाष्टचण्डीविधा
स० नं॥मेरुतन्त्रे॥शितपक्षतिमारभ्यचाष्टम्यन्तुविषस्यच॥जपेल्लदं
मनुंहोमंस्वाद्येह्निमधुनप्लुतैः॥प्रत्यहंपूजयेद्देवींचण्डीमाद्यन्तयोः
॥२९॥ पठेत्॥विप्रान्गुरूंसमाराध्यवांछितंलभतेध्रुवं॥ ॥अथचण्डीवि
धानं॥शम्भुनित्यातन्त्रे॥नवचण्डीविधानंतुकथयत्वमहेश्वर॥येनवि
ज्ञातमात्रेणसर्वसत्वंप्रजायते॥शृणुविस्तारमाकान्तेनवचण्डीविधिंशुभां॥ ॥२९॥
यत्कृत्वाप्राप्यतेस्वर्गंसर्वकामांश्चपुष्कलां॥आश्विनप्रतिपन्मुख्यंपूर्णपास्तु
तिथयोनव॥नवचण्डीयथाप्रोक्तासर्वकामफलप्रदा॥धनपुत्रयशःश्री 273
मानमहाव्याधिविनाशिनी॥महाभयमहादुःखहन्त्रीसौख्यप्रदायिनी॥

तथा॥शुक्लाष्टमीमुपवस्य· यावनशुक्लचतुर्द्दशी॥नवदुर्गाविधानम्या
सर्व्वकार्य्यफलार्थिना॥संपूज्यविधिवद्देवीं चण्डिकाहृतत्पर्य्यां॥कल
शंपंचरत्नाढ्यं सहकालद्दलाकुलं॥सर्व्वत्र संप्रतिस्थाप्य चण्डिकाग्र
मनोन्दृशी॥समस्तान्पूजयेद्दिक्षुदिशापालं यथाक्रमं॥चन्दनेनवि
लिप्ताङ्गः सु[illegible]न्यासपरायणः॥नवाहं वारमेकैकं मौनी वह्मासनी जपे
त्॥कवचोर्ग[illegible]हस्यान्तं चण्डिकाचरितत्रयं॥चतुरस्रे समे कुण्डे सम
न्तोद्धस्तमात्रके॥१कावरगासंयुक्ते योनिमण्डलमण्डिते॥दशांशे विधि
ना होममन्त्रोद्रव्येन साधयेत्॥नवदुर्ग्गासमं कुण्डमेवं ज्ञानीहि केशव॥नि
त्यचण्डीविधानेपि कुण्डमीदृक्प्रकीर्त्तितं॥कृष्णाष्टमीमवस्तभ्य नवदुर्गा
विधानवित्॥यद्यथावुरुते जाप्यं कालरात्रिरुदीरिता॥महाकालोद्रवं दुः
खं कालरात्रिर्व्यपोहति॥संस्कारैरष्टभिः कुण्डस्सकृत्साग्निप्रतिष्ठयेत्॥मा

१२०

यावीजं समोपेतं दुर्गास्तपनसाधकः ॥ कुण्डमध्येतु वर्द्भैः परि-
मास्यविलेखयेत् ॥ प्रागग्रा स्रुचमूलेन रेखास्तिस्रः समुल्लिखेत् ॥ पौ-
स० शुमृत्त्वं त्यलेखानां समुल्भुत्सु ततः परं ॥ कुण्डस्य पूजनं स्यष्टं सप्तमैसप्त-
मुद्रया ॥ अस्त्रावगुण्ठनं कुण्डसंस्कारचाष्टमः स्मृतः ॥ शतमंगलना-
॥२०॥ मानं कुण्डेग्निं संप्रतिष्ठयेत् ॥ चण्डिकापीठं संपूज्य ब्रह्माणं दक्षिणे हि-
जं ॥ ततस्तत्साग्निमत्कुण्डे नवसूत्रेण सूत्रयेत् ॥ कुण्डस्योत्तरतः स्थाप्य
प्रणीतावारिपूरितं ॥ प्रणीतपात्रतः पूर्वं स्थाप्यपात्रमनुक्रमात् ॥ आज्य-
उ स्थाली चरुस्थाली गव्यहीनसमन्विता ॥ स्रुचस्रुवौ च घृतं गव्यं तण्डु- ॥२०॥
लांकुशपूर्वकं ॥ पलाशैस्समिधस्तिस्रः पूर्णपात्रमतः परं ॥ सपूद्वीपेश्वत्रीं
ध्यात्वा गृहीत्वांकुशपूर्वकं ॥ निःक्षिपेत्प्रोक्षणीपात्रं वारुणं बीजमुच्चरन् ॥ २५४

तिलदर्भसमृक्केनभातसैस्थेन संस्थितं ॥ क्रमात्स्पात्रं गत्वा प्रोक्ष्यप्रोक्षणीपात्रवा
रिणा ॥ आज्यपात्रे च संस्थाल्यां निक्षिपेत् घृततण्डुलान् ॥ यथाक्रमेणकर्त्तव्यं तत्त
न्मिश्रमशांतयोः ॥ आज्येनपायसेकार्य्यं पर्य्यग्निकरणं तयोः ॥ संमेपलाश
काष्ठेन तिस्रोदर्भाः समुज्ज्वेलनं ॥ स्रुवयोस्तापनं कार्य्यं प्रणीतोदकसिंचितं ॥
पुनः प्रतपनं कृत्वा दक्षिणे स्थापनं स्मृतं ॥ उद्वास्य प्रथमं पूर्वादादायाज्यं प्रदक्षिणं ॥
कुण्डावाय्यान्तरस्थाप्य स्ववीजजपपूर्वकं ॥ अधिश्याज्यमाग्नेणवायव्ये स्थापये
घृतं ॥ स्ववीजजपसंस्काराद्धेनुमुद्रान्तयोर्भवेत् ॥ तिस्रः पालाशसमिधो मौनी वै
श्वानरे क्षिपेत् ॥ कुशमूलोपमुक्ताभिः प्रोक्षिण्यद्भिः —दक्षिणं ॥ प्रयुक्तान्निप्र
णीतायां निक्षिपेत्कुशमूलकं ॥ निधाय दक्षिणं जानुं भूमौ वह्निमुखेऽनेन ॥ अ
न्वारब्धे स्रुवेनाँज्यं निधूमे हव्यवाहने ॥ प्रजापतिं महाकालीमहालक्ष्मीसरस्वती ॥

२८

रतदग्निमुखंप्रोक्तंमायावीजपुनःसनं॥संस्रवाज्यंद्रुणीपात्रेनिक्षि
पेदग्निसाधना॥विदध्यात्कल्पितंहोमेउक्तेनहविषासमी॥तेनस्विष्टि
९० कृतंदद्याद्बहुविधास्वज्वलेनले॥मायावीजेचब्राह्मीमाहेश्वरीवैष्णवीवाराही
नारसिंहीऐन्द्रीचामुण्डायेविच्चेस्विष्टिकृतेस्वाहा॥मन्त्रेणस्विष्टिकृताहु
॥११॥ तेशक्तिनांवल्पमानकैः॥आज्यस्यनवकंदद्यात्मायावीजादिनामभिः॥न
न्दाभगवतीआद्याद्वितीयारक्तदन्तिका॥शाकम्भरीतृतीयाचदुर्गाभीमा
चतत्परा॥भ्रामरीकालिकाचैवशिवदूतीप्रजापतिः॥गन्धपुष्पफलोपेतं
कृत्वायज्ञात्मकंश्रुवं॥ततःपूर्णाहुतिंदद्यात्स्रुतस्याछिन्नधारया॥नवाक्षरे ॥२१॥
णमंत्रेणमहालक्ष्मीपरायणः॥ध्यायेद्यज्ञपुरोडासममृतंदेवदुर्लभं॥प्रो
क्षणीपात्रेमध्यस्थंमंत्रंप्राणातिसंस्रवान्॥यस्याययज्ञरसात्पुतायज्वानोब्रह्म
तर्पिणः॥

२०५

संस्त्रवं च वुभेऽडसे प्राप्नुभिः सुखपुण्यपरं ॥ सलीलेन प्रणीता यातीर्वध्यान
मनायतः ॥ करोति मार्जनं दर्भैः शतेन श्लोकपाठके ॥ याः शिवा याश्च
शाक्षेया· याश्चिभिश्च सविता सह ॥ या आपः स्यन्दधानास्तामेहिनावन्तुभै
वजे ॥ अभिषिंचेदथात्मानं चतुर्भिश्चाण्डिकास्तवैः ॥ दानं दद्याद्विधानेन हेम
रत्नाम्बरादिकं ॥ नवतत्वंमहादेवी पापतापप्रणाशनं ॥ सर्व्वैश्वर्य्यप्रदा देवी कुर्व्व
ताम विलम्बिता ॥ नवदुर्गाविधानेस्मिन्यत्फलं परिकीर्त्तितं ॥ कालरात्रिविधा
नेपितत्फलंलभते ध्रुवं ॥ एतत्त्रिगुणितं सर्व्वं नवदुर्गाजपेत्फलं ॥ कथितं त
त्वाप्नोति नवचण्डीकृते जपे ॥ मनसा चिन्तितं कार्य्यं कार्य्यसिद्धिः प्रजायते ॥
शारदे चाश्विने मासे शुक्लपक्षे शुभे दिने ॥ प्रतिपत्तिथिमारभ्य· नवचण्डीसमाच
रेत् ॥ तोरणाढ्ये शुभे स्थाने स्ववितानेस्वलंकृते ॥ पूर्व्वादिक्रमयोगेन· दिग्दे
विभ्यो बलिं हरेत् ॥ गन्धपुष्पाक्षतैर्धूपैर्दीपैश्चरुभिस्तमैः ॥ कादम्बरी गजान्न
ढापुनरुक्ताजपृष्टगा ॥ करालीमहिषारूढा रक्तादीप्रेनसंस्थिता ॥ श्वेतकोमी

२२

रगान्धेता·हरित्राहूषवाहना॥यत्हृणीसिंहपृष्ठस्थाकंकालीहूषवाहिनी॥
हंसपृष्ठेसुरज्येष्ठासर्प्पनाट्रविवाहना॥अनेनविधिनादत्वादिग्गृहि
स७ भ्यो वलिं जपी॥नवग्रहाल्लोकपालान्दिक्पालांश्चप्रपूजयेत॥कलशप
चरत्नाढ्यं हेमवस्त्रादकाञ्चितं॥सप्रतिष्ठाप्यसंपूज्यचण्डिकार्च्चनमा
॥२२॥ नेमेत॥पूर्वोक्तेनविधानेनगन्धपुष्पैरनुत्तमैः॥वस्त्रालंकारसिन्दूरक
स्तूर्य्यगरुकुंकुमैः॥वहुभिर्धूपदीपैश्चनैवेद्यैर्वलिसंस्थया॥कृत्वातुपूज
नंसर्वंजपेदेकाग्रमानसः॥सेह्वेडहस्यसंयुक्तंचण्डिकाचरितत्रयं॥
कुमारीविप्रमुख्यांश्चभोजयेद्विधिपूर्व्वकं॥यदाद्यदिवसेकुर्य्याच्चण्डिकापूज ॥२२॥
नादिकं॥द्विगुणंतद्वितीयेह्निः त्रिगुणंतत्परेहनि॥नवमीतिथिपर्य्यन्तमेवं २२।
पूजाजपादिकं॥एकाहारंव्रतीकुर्य्यात्सत्यवान्नियमैर्युतः॥कृत्वाहोमादिकंसर्वं

नवदुर्गाविधानवित्॥ वित्तशाठ्यं परित्यज्य कुर्य्यादाचार्य्यतोषणं॥ वस्त्रौ
[illegible]लीयधेन्वादि· वाजिहेमप्रदानतः॥ अशक्तो निष्कमेकंस्य· दद्यादसौ
प्रयत्नतः॥ शतचण्ड्यास्य फलं देवी· यो हि कश्चिदनेन वै॥ विदधाति विधाने
न· यत्नेन नवचण्डिका॥ इन्द्रब्रह्मादयो देवि· समायान्ति प्रसेवितुं॥ अपुत्रो
लभते पुत्रं निर्द्धनः सुधनी भवेत्॥ अविद्यो लभते विद्यां स्वकामांश्चापि का
मुकः॥ व्याधयः संक्षयं यान्ति शत्रुर्वश्यः सुदारुणः॥ न तस्यास्ति भयं किंचि
द्राजचौराग्निवारिजं॥ ॥इति नवचण्डीविधानं॥ ॥मेरुतन्त्रे शत्रूनिसात
न्त्रे च॥ शतचण्डीविधानं तु प्रवक्ष्ये प्रीतये नृणां॥ नृपोपद्रव आपन्ने दुर्भिक्षे
भूमिकम्पने॥ अतिवृष्ट्यामनावृष्ट्योपरचक्रभये क्षये॥ सर्वविघ्ना विनश्यन्ति शतचण्डी
विधौ कृते॥ रोगाणां वैरिणां नाशो धनपुत्रसमृद्धये॥ ॥वाराहीतन्त्रे॥ यदा यदा

२२

सतंहानिरलक्ष्मानिनैवच॥ तदाकार्य्यशतांवृत्तिं रिपुघ्नंभूमिवर्द्धनं॥
दुःस्वप्नदर्शनेघोरेमहामारीसमुद्भवे॥ पुष्टिप्रदेशतावृत्तिं·पुंसामायु
१० क्षयोनच॥ महाभये–दयोगेदुर्भिक्षेमरकेपिच॥ कुर्य्यात्तत्रशतावृत्ति
॥२२॥ देवीमाहात्म्यमुत्तमं॥ प्रभूत्वेचसमुत्पन्ने·वा–चवानांमहोत्सवे॥ कुर्य्याद्वात्रं
शतावृत्तिंसर्व्वसम्पत्तिकारकं॥ शतावृत्त्याभवेदायुः शतावृत्त्याधनागमः
वश्याभवन्तिराजानः स्त्रियमाप्नोत्यनुत्तमं॥ धनार्थीप्राप्नुयादर्थंपुत्रकामोल
भेत्सुतं॥ विद्यार्थीप्राप्नुयाद्विद्यांरोगीरोगात्प्रमुच्यते॥ चतुर्वर्गफलावाप्तिका
रणंरिपुनाशनं॥ चण्डीशतावृत्तिफलंवराननेयस्यान्तथा॥ ॥हाडिमते॥ देवी ॥२३॥
पीठेशिवाभ्यासेत्वदत्यासेचकारयेत्॥ देवालयेसुतीर्थेवागोष्ठेद्विजगृहेपिवा॥
पुण्यारण्येस्वगृहेवाचण्डिकायज्ञनंभवेत्॥ ॥अथकालादिव्यवस्थानत्रेवा॥ 244

उत्तरायणस्थिते हंसे· शुक्लपक्षे तथा शुभे ॥ ताकेन्दुभृगुजीवे च शुयो
गे सुतिथौ तथा ॥ पातकर्क्कच षष्ठादि दोषहीने स्थिरोदये ॥ स्थापयेदु
विन कुम्भं उत्तराभिमुखः स्वयं ॥ न विदध्याद्गुरौ सुप्ते भूकम्पाकालवर्षणे ॥
वज्रोये दुर्गमोत्पाते गुर्व्वादिभ्यादिके तथा ॥ महागुरौ विपन्ने च संवशो
कार्य्यवस्तुनि ॥ शतावृत्त्यादियोगे तु न विदध्यात्कदाचन ॥ त्रिपंचसप्तभिर्द्वा
पि नवैर्द्वादशभिस्तथा ॥ अदीर्घे द्विवसैः क्षिप्रं· विदध्याच्चण्डिकामयी ॥
अयुग्मैः ब्राह्मणैः कार्य्या· शतावृत्तः सुसिद्धये ॥ त्रिपंचसप्तनवभिः
दिनैः पक्षे न वा पुनः देवीमाहात्म्यपाठन्तु· युग्मे विप्रैः कृतन्तु यत् ॥
निःफलं च भवेत्सर्वं· भूमिनाशं वदुर्म्मतिः ॥ दश द्वादश सप्ता वा· च
तुर्द्वारं सुशोभनं ॥ चतुरस्रं पताकाढ्यं मण्डलं वेदिभूषितं ॥ षोडशस्तं

ष्ठ

भसंयुक्तं पुष्पपल्लवशोभितं ॥ वसुकोणसुतान्देवि भद्रं कुर्य्यात्रिभा
स० गतः ॥ पद्मैक[illegible]कचितां रम्यां मुद्राये हस्तसंमितां ॥ सर्व्वलक्षणसंपन्नां
वेदीं कुर्य्यान्मनोहरां ॥ पंचवर्णैर्जोभिश्च कुर्य्यान्मण्डप - शुभं ॥ सर्व
॥२४॥ तोभद्रसंज्ञं च मनोहारिसुशोभनं ॥ पंचवर्णवितानं च किंकिणीजाल
मण्डितं ॥ प्रवालैर्मौक्तिकस्रक्तं च व्रीयान्वितेन शुभं ॥ श्वेतपुष्पैस्तथा
रक्तैः पीतश्चापि सुसंवृतं ॥ नीलोत्पलैः कोकनदैः भूषितं श्रीफलैस्तथा ॥
आम्रपल्लवमालाभिर्दूर्वाभिर्मण्डपं शुभं ॥ ॥मेरुतन्त्रे॥ मण्डपं द्वारवे ॥२४॥
द्याढ्यं कुर्य्यात्सध्वजतोरणं ॥ तत्र कुण्डं प्रकुर्व्वीत प्रतीच्यां मध्यतोपि वा ॥ ॥ 291
क्रोडतन्त्रे ॥ विधिमंत्रं प्रवक्ष्यामि स्वरूपवरवर्णिनि ॥ निमंत्रयेद्यथापूर्व्वं विधु

र्विप्रान्विद्यासमन्वितान्॥ ॥मेरुतन्त्रे॥ स्नात्वा नित्यकृतिं कृत्वा योजयेद्दे
शवाडवान्॥ जितेन्द्रियान्सदाचारान्कुलीनान्सत्यवादिनः॥ नित्यन्त्रोस्व
ष्टिकापाठनतो लज्जोदयावतः॥ मधुपर्कविधानेन वस्त्रस्वर्णादिदानतः॥
॥मार्कण्डेयपुराणे॥ मधुपर्कविधानेन यथावत्तद्वदाम्यहं॥ स्त्रीपर्णीवृन्त
पाठानि हस्तमानानि मानतः॥ अष्टाङ्गुलसमुद्धायसहितानि समानि च॥ उ
वास्तुचौसमायुक्ता मुखादिलक्षणान्विता॥ सप्तविंशतिदर्भाणां वेद्याग्रे ग्रथि
भूषिताः॥ विस्तरं सर्वयज्ञेषु लक्षणपरिकीर्त्तितं॥ सुखोष्णोदसम्पूर्णं पाद्यार्थे
ताम्रपादुका॥ शंखश्चार्घप्रदानाय गन्धपुष्पयवान्विताः॥ सम्पुटा मधुपर्का
र्थिकास्यद्दध्यादिसंयुता॥ महस्महीनिवस्त्राणि मुद्रिका सुभूषणं॥ मयूरपत्र
छत्राणि सोष्णीषाणि समाहरेत्॥ पादुकाहाहस्तेनताम्रभूषितभूषिता॥ अन्येस्मोते

पदेत्तुक्तं मधुपर्कस्य पूजनं॥ ॥मेरुतन्त्रे॥ जपार्थमासनं मालां दद्यात्तेभ्योपि भो
जनं॥ तेहविष्यान्नमश्नुनो मन्त्रार्थगतमानसः॥ भूमौशयानाः प्रत्येकं जपेयु
श्चण्डिकास्तवः॥ मार्कण्डेयपुराणोक्तं दशकृत्वः सचेतसः॥ तथा॥ दावृशे
त्ति विदुदोषः पाठेऽस्मिञ्छुभकर्मणि॥ शारदाया विरहे तु पाठ शान्ति
कपौष्टिके॥ सार्थस्मृति पठेच्चण्डीस्तोत्रस्य षट्पदान्तरं॥ ॥कौडतंत्रे॥ अ
लोलुपानृजूञ्शान्तांन्देव्याभक्तिसमन्वितान्॥ मन्त्रोपयन्त्रतन्त्रज्ञान्शात
वृतेनयोजयेत्॥ आचार्यं न समं विप्रान्वरयेद्दशसुव्रतान्॥ वस्त्रान्तरीयैः
सुशुभैः पालिमज्ञोपवीतकैः॥ कर्णाभरणभूषैश्च भोजनैर्वरयेत्सुधीः॥
दशान्यां स्थापयेत्कुम्भं पूर्वोक्तविधिना नरः॥ संस्कृत्य भूमि संस्थाप्य कलशं
तीर्थवारिणा॥ पूरयित्वा स्वर्णगर्भं क्षिपेदृष्टोमरदत्तथांतः॥ धर्मकामः क्षिपे
त्स्वर्णं धनकामस्तु मौक्तिकं॥ स्त्रीकामः कमलं न्यस्य कामार्थी रोचनं क्षिपेत्॥

प्रान्ते कामो न्यसेद्छत्रं जयकामोपराजितां ॥ उच्चाटे — व्याघ्रीवत्स्यार्थंशि
खिमूलकं ॥ मारणाय मरीचं च · कितवं मोहनाय च ॥ आकर्षणान्तु सेवन्तीप्र
क्षिपेत्कलशोदरे ॥ मधुपर्कस्त्वद्रव्याद्वै घृतानां विबुधाधिप ॥ वासल्यां च प्रक
ल्प्यां कुण्डलहस्तालङ्कृतं ॥ मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन हि ॥ त
दर्द्धेन च कुर्याद्वा तदर्द्धेन महामते ॥ अष्टादशभुजां देवीं कुर्याद्वा सुकरामपि ॥
पट्टकूलयुगच्छन्नां वेदिमध्ये निधापयेत् ॥ प्रतिष्ठापनमन्त्रेण प्रतिष्ठापनमुत्त
मं ॥ पुण्याहवाचनं कृत्वा पूजयेत्क्रमशस्ततः ॥ नवग्रहादिशापालास्तथावरण
सप्तकं ॥ सम्पूज्य कलशं पूज्य प्रतिमायाश्च पूजनं ॥ परितो मण्डलस्याष्ट बलिदा
नं सुरेश्वर ॥ मण्डपस्य चतुर्द्वारे द्वौ द्वौ कुम्भौ निवेशयेत् ॥ तीर्थोदकसुसम्पन्नौ
स्वर्णपल्लवशोभितौ ॥ ततः सम्पूजयेद्देवीं गुग्गुलुं चागुरुं शुभां ॥ कस्तूरीकुंकु
मं देवकर्पूरं चैव चन्दनं ॥ दिव्यवस्त्रमलंकारं सुवर्णनजतान्वितं ॥ श्वेतपुष्पाणि

२९

श्वेताश्वगुग्गुलुं चागुरुं शुभं ॥ ताम्रपात्रे कृतं दीपं श्वेतवर्त्तिघृतान्वितं ॥ हवि
ष्यान्नं च नैवेद्यं पायसं शर्क्करान्वितं ॥ ताम्बूलविटिकं चैव शक्त्या स्वर्ण्णं ददेत शु
स० भं ॥ नवचण्डीविधानोक्तं सुजनं सुरदुर्ल्लभं ॥ दशभिः ब्राह्मणैः सार्द्धं स्याच्च
ण्डीविधानतः ॥ गृहीत्वा ब्राह्मणांश्चाप्यथ जपं कुर्य्याद् दशद्विजः ॥ शतमाहोम
॥२९६॥ तं चान्ते जपस्यैव न वा लोके ॥ चण्डीसप्तशतीमन्त्रसंयुतो यमुदाहृतः ॥ स
कामः सम्पुटे जाप्यः निष्कामः सम्पुटं विना ॥ शुद्धासनेनूपविष्टो न्यासध्या
नयुतान्वितैः ॥ चण्डीपाठं प्रकुर्व्वीत चण्डिकाचरितत्रयं ॥ सरहस्यं ऋषि
छन्दोदेवताशक्तिसंयुतं ॥ जपेदन्त्यमेकैकं मौनी सन्यतमानसः ॥ प्रदक्षि ॥२९६॥
णनमस्कारैः देवीं सन्तोषयेत्प्रभो ॥ ॥ अथ सहस्रचण्डीपाठविधानं ॥ ऋडीम
ते ॥ ॥ श्रीभगवानुवाच ॥ भवानीश महादेव नीलकण्ठ उमापते ॥ सहस्रच २४०
ण्डिकापाठं कथं कुर्य्यात्सुरेश्वर ॥ कृते तु तेन किंचित्स्यात तद्वदस्व महेश्वर ॥ ।

ईश्वर उवाच ॥ शृणु विष्णो मम भक्तसहस्रस्य विधानकं ॥ पुत्रकामेन कर्त्तव्यं
धनकामेन चेश्वर ॥ चक्रवर्त्तित्वकामेन शत्रुने मारणे तथा ॥ राज्यभ्रष्टे म
होत्पाते जनमारे महाभये ॥ गजमारे श्वमारे च पन्नवक्रभये तथा ॥ इत्यादि
विविधैदुःखैः राजयक्ष्मादिजे भये ॥ सहस्रावर्त्तिकापाठं कुर्य्याद्वा कारये
तथा ॥ जापकास्तु शतं प्रोक्ता विंशद्वस्तुस्तुमं - यः ॥ भोज्याः सहस्रं विप्रेन्द्रा गो
शतं तत्र संदिशेत् ॥ जापकेभ्यो दिशेद्दक्यं परार्द्धार्द्धप्रमाणतः ॥ धेनवो द्विगु
णा देयं शय्यादानं तथैव च ॥ सप्तधान्यं च भूदानं श्वेताश्वं तु मनोहरं ॥ हेमं च
तिलपात्रं - दद्यात्स्वर्णं तथाहुती ॥ पंचनिष्कमिता मूर्त्तिः कर्त्तव्या चार्द्धमान
तः ॥ अष्टादशभुजा देवी सर्वायुधविभूषिता ॥ अथवानितान्नदातव्यं सहस्रं प्र
त्यहं विभो ॥ शते चानियतं दानं नवाणिलहमात्रकं ॥ जपेच्च नियताहारः प
यःपानेन वर्त्तयेत् ॥ फलाहारेण वा देव सहस्रन्तु स्तुतिञ्जपे ॥ नानेन सदृशी

२१

त्रिषा· विद्यते भुवनत्रये ॥ सहस्रपाठकर्म्मार्थी राजते सर्व्वमण्ड

ले ॥ देवीपूजा प्रकर्त्तव्या· पूर्व्वोक्तेन विशेषतः ॥ पूजनं च कुमारीणां होम

२० मेव दशांशतः ॥ पूजनं वै बटुकस्य· पूर्व्वोक्तविधिना प्रभो ॥ पुनः पूजा प्र

कर्त्तव्या नात्रौ जागरणोत्सवं ॥ यवाङ्कु·रानथापाय· यजमानः करोति हि ॥

॥२७॥ सुरामांसैस्तथान्नैः कुष्माण्डे बलिमाचरेत् ॥ इन्द्रादिलोकपालेभ्यः साधु

वेभ्यो यथाक्रमं ॥ दिननाथविशिष्टेभ्यः सर्व्वेभ्यश्च यथागतं ॥ अन्नदानेन वि

शिष्टं च कुर्य्याद्देवीप्रयत्नेनः ॥ एवं चण्डिकापाठं सहस्रंतु समाचरेत् ॥

तस्य यस्यात्कार्य्यसिद्धिर्न्नात्र कार्य्याविचारणा ॥ अतः परतरं नास्ति त्रिषु लो ॥२७॥

केषु माधव ॥ स्तुतिपाठसहस्रस्य फलं प्रोक्तं मया तव ॥ किमन्यो क्रतुमिष्ठा

कृतहृदस्य सुरेश्वर ॥ तववाक्यामृतं पीत्वा· देवीप्रीतिकरं विभो ॥ आनन्दो

५१

मृतपूर्णोहं जातस्त्वद्भक्तिसेवनात् ॥ श्रुत्वादेवीचरित्रन्तु नान्यादिक्षामि शं
कर ॥ रमाकान्तसुराधीशप्रोक्तं गुह्यतरं मया ॥ नानुरूपाय वक्तव्यं परशि
ष्याय नो वदेत् ॥ देवीभक्ताय वक्तव्यं मम भक्ताय माधव ॥ त्वद्भक्ताय च व
क्तव्यं न मूर्खाय तताथिने ॥ सत्यं सत्यं पुनः सत्यं उद्धृत्य भुजमुच्यते ॥ नानुया स
दृशी विद्या न गङ्गासदृशी नदी ॥ न वैकुण्ठसमं धाम न मुक्तिः काशिकां विना ॥
न राज्ञा कार्त्तवीर्य्याद्धि शतं सत्यं सुरेश्वरः ॥ ॥ अथ कुमारीपूजा ॥ यजमा
नः पूजयेत्तु कन्यानां दशकं शुभं ॥ द्विवर्षाद्द्वादशान्तो [illegible] कुमारीपरिपूजयेत् ॥
नाधिकाङ्गीं न हीनाङ्गीं कुष्ठिनीं च व्रणाङ्कितां ॥ अन्धां काणां केकरांच कुरूपां
रोगयुक्तां तु ॥ दासीजातां भोगयुक्तां दुष्टां कन्यां न पूजयेत् ॥ विप्रं सर्वेष्टसंसि
द्ध्यै यशसे क्षत्रियोद्भवां ॥ वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां [illegible]नेत् ॥ द्विव
र्षा सा कुमार्युक्ता त्रिमूर्त्तिर्हायने त्रिका ॥ चतुरब्दा तु कल्याणी पंचवर्षा तु रोहिणी ॥

षड्वर्षा कालिका प्रोक्ता चण्डिका सप्तहायना ॥ अष्टवर्षा शांभवी स्याद्दुर्गा तु
नवहायना ॥ सुभद्रा दशवर्षोक्ता तान्मन्त्रैपरिपूजयेत् ॥ एकाब्दा या प्रीत्यभावोत्तु
मं० द्व्यब्दा तु विवर्जिता ॥ तासामावाहनं मन्त्रः श्लोकरूपो निगद्यते ॥ ॐ मंत्राक्ष
रमयीं लक्ष्मी मातृकारूपधारिणी ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं ॥
॥२८॥ कुमारीकादिकन्यानां पूजामंत्राश्च वेधुना ॥ जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्व
रूपिणि ॥ पूजां गृहाण कौमारी जगन्मात्रे नमोस्तु ते ॥ त्रिपुरां त्रिपुराधारां त्रि
वर्गज्ञानरूपिणीं ॥ त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहं ॥ कलात्मिकां
कलातीतां कारुण्या:हृदयां शिवां ॥ कल्याणजननीं नित्यां कल्याणीं पूजयाम्य ॥२८॥
हं ॥ चण्डवीरां चण्डमयीं चण्डमुण्डप्रभञ्जनीं ॥ पूजयामि सदा देवीं चण्डिकां चण्ड
विक्रमां ॥ सदानन्दकरीं शान्तां सर्वदेवनमस्कृतां ॥ सर्वभूतात्मिकां लक्ष्मीं शां
भवीं पूजयाम्यहं ॥ दुर्गमेदुस्तरेकार्य्ये भवदुःखविनाशिनीं ॥ पूजयामि सदा भ ५२

त्या दुर्गा दुर्गतिनाशिनी ॥ सुन्दरी स्वर्णवर्णाभा· सुखसौभाग्यदायिनी ॥ सु
भद्रजननीं देवी सुभद्रां पूजयाम्यहं ॥ एतैर्मंत्रैर्लब्दलक्षोत्तानाकन्यांसम
र्चयेत् ॥ गन्धैः पुष्पैः भक्ष्याद्यैः वस्त्रैराभरणैरपि ॥ वेद्यां विरचिते रम्ये सर्वतो
भद्रमण्डले ॥ घटं संस्थाप्य विधिवत्तत्रावाहयेच्छिवां ॥ तदग्रे कन्यकाश्चा
पि· भोजयेद्ब्राह्मणानपि ॥ उपरागेश्चविविधैः पूर्वाह्नाचरणान्यपि ॥ एवं चतुर्दि
नं कृत्वा पंचमे होममाचरेत् ॥ ॥ शक्रूनित्यानत्रे ॥ दद्यादाचमनं तस्यै दद्याद्व
स्त्रं सुकंचुकं ॥ सकंकनांगुलीयानि कर्णालंकारशोभनं ॥ ग्रैवेयकं प्रदत्वा च
चन्दनेन विलेपयेत् ॥ पूजयेत्पुष्पमालाभिर्दिव्यैर्धूपैः सुधूपयेत् ॥ कुर्यादारा
त्रिकं देवीउदयेवाच्युतामुरुः ॥ भोजयेद्भक्तिभावेन पायसं घृतशर्करान् ॥ सु
पक्वान्नानि चान्नानि दम्भमोहविवर्जितः ॥ फलानि च सुस्वादूनि दद्यादस्यै पु
नः पुनः ॥ यावत्या भोजनं कुर्यान्नीलस्तोत्रं जपेत्सुधीः ॥ दद्यादाचमनं तस्यै त

फलं च समर्प्पयेत् ॥ तोषयेद्धेमदानेन कुमारीं प्रणतः सुकृत ॥ प्रदक्षि-
णा नमस्कारं कृत्वा मूर्द्धि कृतांजलिः ॥ विसर्जयेत्कुमारीं तां स्वगृहे
स० सखिभिस्त्रिः ॥ अनेन विधिना भक्त्या कुमारीं यस्तु पूजयेत् ॥ स पृथ्वी-
राज्यमासाद्य श्रिया सायुज्यतां व्रजेत् ॥ यं यं प्रार्थयते कामं देवानामपि
॥२२॥ दुर्लभं ॥ कुमारीपूजनं कृत्वा तं तं प्राप्नोत्यसंशयः ॥ ब्रह्मविष्णुमहेशा-
नां कुमारीपरमा कला ॥ तत्पूजनेन देवेषि त्रैलोक्यं स्यात्सुपूजितः ॥ स-
म्यक्क्रतुफलं दत्तस्य चतुर्वेदफलं भवेत् ॥ सर्वतीर्थफलं तस्य चतुर्वर्गफल-
प्रदः ॥ सर्वतीर्थफलं तस्य यः कुमारीं समर्च्चयेत् ॥ ॥ दुर्गायाः परमेशान
दीपदानविधिं प्रभो ॥ येन कृत्वा नराभाग्यं प्राप्नोति ब्रूहि शंकर ॥ सुदिने सु- ॥२३॥
काले रम्ये स्थण्डिले चतुरस्रकं ॥ कृत्वा तु गोघृतेनैव त्रयोदशसु संख्यकां ॥
वर्त्तीतारण्डके पात्रे मायीन्प्रज्वाल्य दीपकान् ॥ भक्त्या कालेन संस्थाप्य

243

रक्तकार्य्योसवर्त्तिकान्॥आवाहयेदर्घदीपेः प्रथमाध्याय देवतां॥पू
जयेद्विधिनादेवीमुपचारैस्तुषोडशैः॥श्लोकेश्चनवभिर्दत्वापुष्पाणिचै
नाहरेत॥आद्याध्यायप्रतिश्लोकेमेकेकंपुष्पमर्च्चयेर्च्चयेत॥धूपदीपंचनै
वेद्यंपायसमुखवाससं॥सदक्षिणाफलंचैवनीराजनमथार्प्पयेत॥द्वि
तीयदीपेस्मधूरेद्वितीयाध्याय देवतां॥क्रमात्त्रयोदशान्तंहि महापूजांत
तस्मरेत॥पूर्वोक्तंसौम्यकर्म्मन्तु क्रूरस्यादपराह्निके॥कटुतैलेनक्रूरायेप्रेतभू
मिस्तुबर्प्परे॥उन्मत्ततैलकैर्वापिप्रेतकर्प्पटवर्त्तिभिः॥नीलैःकुसुमैर्गुग्ग
लैः पुष्पैर्नैवेद्यपूजनैः॥स्वयंचतादृशोभूत्वाश्मशानेदणामुखः॥विश्वेश्व
रीयासंस्तुतायासाप्रतंयासंस्तुता॥सर्वबाधासर्वमांगल्यःस्पष्टिश्चशरणाग
तः॥सर्वस्वरूपेतिनव॰श्लोकानुग्रहकर्म्मणि॥निग्रहेसर्वबाधान्तेएव मन्त्वेततो

३०

वदेत् ॥ वैरिनाशनमित्यर्थं रोगे रोगविनाशनं ॥ पुनः प्रपठ्य देवेशिं क्षम
ष्व च विसर्ज्जयेत् ॥ तत्तु पलेहः प्रत्याल्यक्ष्लवर्त्तिसमन्वितः ॥ [illegible]नाधिपो
९०. पूजडुडुवैरिणः प्रपलायते ॥ ॥ अथ सप्तशतीधारणं लिख्यते ॥ तत्रायं क्रम ह
मगौरीतन्त्रे ॥ ॥ यदाधर्मे महाहानिर्नात्मनाग्लानिरेव च ॥ तदा धार्य्या सप्तशती हि
॥३०॥ पुष्टीभूतिवर्द्धिनी ॥ दुःस्वप्नदर्शने घोरे ॥ महामारीसमुत्थिते ॥ पुष्टिप्रदास
प्तशती पुंसां मायुः क्षयेपि च ॥ महाभये दुर्योगे दुर्भिक्षे मनकेपि च ॥ धार
येत्सप्तशतिकां त्रैलोक्यशुभगा प्रिये ॥ चण्डिकायजनं कुर्य्याद्यथाशक्तिविधि
धानततः ॥ कुर्य्यात्तत्र क्षतावर्त्तं देव्या माहात्म्यमुत्तमं ॥ धारणे सप्तशत्यास्तु विधि
श्रृणु वरानने ॥ धारणाच्छुभवेदायुः धारणाच्च धनागमः ॥ वश्या भवन्ति राजानः
श्रियामाप्नोत्यनुत्तमां ॥ धनार्थी प्राप्नुयादर्थं पुत्रकामो लभेत्सुतं ॥ विद्यार्थी लभ ॥३०॥
ते विद्यां रोगी रोगात्प्रमुच्यते ॥ चतुर्वर्गफलावाप्तिकारणं रिपुनाशनं ॥ स्त्री

५४

चण्डीध्यानगासमं॰ नास्ति यत्तं वरानने ॥ चण्डीशतावर्त्तसमं नास्ति यत्नं महे
श्वरी ॥ ध्यारणेसप्रशस्तास्तु शतावर्त्तं विधीयते ॥ चण्डीध्यारण चण्डीपा
ठस्यावश्यकत्वमू॰ क्तं ॥ शुभेतिथौ शुभेलग्ने शुभे वारे विशेषतः ॥ कुर्याद्
लिखनारंभं सप्रशस्ता शुभावहं ॥ आदौ तु कवचं लेख्यं पश्चात्सप्तशतीं लिखेत् ॥
चण्डिकाभक्तियुक्तेन ब्राह्मणेन लिखेन्मुदा ॥ सदाचारवता सम्यक् शुद्धाशुद्धवि
चारणः ॥ भूर्यपत्रे सप्तशतीं लिखेद्धेमशलाकया ॥ गोरोचनसकर्पूरे श्रीखण्ड
कुंकुमानि च ॥ अगरुकमदसिन्दूरकस्तूरीसमम्धूनिव ॥ एकीकृत्य लिखेन्मन्त्रीशक
भक्तेन सुस्थितः ॥ चण्डिकां हृदये न्यूलेकुर्यात्सुभे दिने ॥ शुभेहनि ततः कुर्या
द्यन्त्रमण्डपमुत्तमं ॥ चतुर्द्दिक्षु चतुर्द्वारं तोरणेन विभूषितं ॥ शोभाढ्यपुष्पमालाभि
कुर्यात्तत्रविशेषतः ॥ ब्राह्मणान्वरयेत्तत्र शतावर्त्तेविशेषतः ॥ विधिमन्त्रप्रवक्ता
मिष्टान्नभूवनवर्णिनि ॥ निमन्त्रयेत्तु पूर्वेद्युर्द्विप्रान्विद्यासमन्वितान् ॥ नित्यादि
शतावर्त्तमित्युपलक्षणं ॥ यथाशक्ति वा कारयेदिति ॥ धानगांसप्रशस्तास्तुवक्ष्ये

२

शास्त्रमतं विधिं ॥ सिद्धक्षेत्रे देवगृहे समुद्रस्य च सन्निधौ ॥ कुवेरसँमुखो भूत्वा द्वि
हस्तमितस्थण्डिले ॥ अष्टकोणं तर्गतं तत्पद्मं महत्पत्रं सुवर्तुलं ॥ तद्बहिः षो
डशदलं द्वात्रिंशल्लक्ष लिखेत् ॥ वक्रोणं पीतवर्णेन पुगं पीतेन पूरयेत् ॥ वै

सि० ९

ष्णवीन्यपहिःर्व्यञ्जपंचवर्णैः परिलिखेत् ॥ चतुर्द्वारैस्स्थलं हीनं तत्र पूजा समार
भेत् ॥ गणेशं पूजयेदादौ पृष्ठे चापि तथा ग्रहान् ॥ तद्बहिर्लोदिगीशांश्च प्रम

॥श्री॥

णं कर्णिकेर्च्चयेत् ॥ भृत्यादीन् पूजयेत्पत्रे प्रथमस्सप्तशतीं जपेत् ॥ दद्यात्तत्राप
निकाद्य पंचवस्तु थ गन्धैः ॥ श्रीमहेशपुराणे नानयुक्तैः सन्निधिस्य बुद्ध्याबरचिननुम
त्वा चण्डिकाभक्तिभाजा ॥ ग्रन्थः प्रोद्यत्प्रमाणैः प्रचुरतरलसद्युक्तिमुक्तावितानैः ॥ ॥१२॥
न्नाभद्राद्वबुद्ध्यादृढतमतिसुधिः शोधनीयो भवद्भिः ॥ ॥ इति नवमीसिं
हकृतायां चण्डीभक्तिविनोदिन्यां द्वितीयः पटलः समाप्तः ॥ शुभं भूयात् ॥
यथादृष्टं तथा लिखितं ॥ लिखक वृद्धब्राह्मणेन गुरुल्याअष्ठक्ष्यामसेतोबानदी
यते ॥ ॥

१।२।३।०

८२ श्रीअथ दशदानविधि॥ गोदानं॥ पूजांविधाय॥ ॐ अद्यास्य स्वर्गप्राप्तिसप्त३कुलत्रूपूर्वेतं ऊ लोमसमसंख्यवर्षावछिन्नस्वर्गवासकामो गा
मिकां रुद्रदैवतां यथानामगोत्रायेत्यादि॥ गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश॥ यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च॥ दा॥ प्रतिमा॥
भूदाने॥ पूजादि॥ ॐ अद्य षष्ठिवर्षसहस्रावछिन्नस्वर्गलोकाधिकरण स्वर्गलोकवासप्राप्तिकाम इमां भूमिं विष्णुदैवतां य
था नाम गोत्रायेत्यादि॥ सर्वभूताश्रयां भूमिं वराहेण समुद्धृता॥ अनन्तसस्यफलदा ह्यतः शांतिं प्रय[illegible]वलोका
धिकरणकलशाश्वत्थार्बुदसहस्रावछिन्नस्वतेजोदीप्यमानबहुविधविमानाधिकरणकं दर्पसमानरूपत्वकामिय
नं.१८ विष्णुलोकाधिकरणात्तदुत्तरमनुष्यकुलजन्मोत्तर सर्वतः कामदुघामहीप्राप्तिकामो वा॥ ॥ तिलदाने॥ अद्य स्वर्गलो
कमहितत्वकामस्तान्तिलान्सोमदैवतान् यथानामगोत्रायेत्यादि॥ ॐ तिलाः पुण्याः पवित्राश्च तिलाः सर्वकरास्मृ
ताः॥ शु[illegible]वामदिवाकृष्णा ऋषिगोत्रसमुद्भवाः॥ महर्षिगोत्रसंभूताः करपपस्य तिलाः स्मृताः॥ तस्मादेषां प्रदाने
न मम पापं व्यपोहतु॥ आदित्यपुराणोयेहिरण्यदानं॥ ॐ अद्य मातृपितृकजन्मदवक्जन्मोपार्जितपापक्षयद्वारि
आदिदर्शनमारिमुह्रा प्रवालवैडूर्यालंकृततलबहुगंधर्वबहुप्सरसः स्तूयमान रुद्रलोकगमनोत्तर वि
ष्णुलोकगमनकाम इदं हिरण्यमग्निदैवतं यथानामगोत्रायेत्यादि॥ दाप्र॥ स्वटकं विष्णुसंभूतमपत्यं पा
वकस्य च॥ सुवर्णदानेनानेन मम पापं व्यपोहतु इत्युक्त्वा दद्यात्॥ ॥ सघृततैजसपात्रदाने॥ पूजादि पूर्ववत्॥

[illegible]

ॐ अद्य उत्तमारोग्यस्वर्गवासःकामयतानि सघृततेजसपात्राणि विष्णुदैवतानि अमुकगोत्रायेत्यादि ॥ दक्षिणादिकं पूर्ववत् ॥५॥ वस्त्रदाने ॥ ॐ अद्य वैराजलोकप्राप्तिपूर्वकदशवर्षकोटिवर्षावच्छिन्नस्वर्गवासकामः इदं वस्त्रं बृहस्पतिदैवतं यथानामगोत्रायेत्यादि ॥ शरण्यं सर्वलोकानां लज्जाया रक्षणं परं ॥ सुवेषधारि त्वं यस्माद्वासः शांतिं प्रयच्छ मे ॥६॥ धान्यदाने ॥ ॐ अद्य सर्वकमनीयलोकाधिकरणाक सर्वधनोपेतभोगवत् अन्नप्राप्तिकाम इमानि धान्यादीनि प्रजापतिदैवतानि यथानामगोत्रायेत्यादि ॥ धान्यं करोति दातारं इह लोके परत्र च ॥ तस्मात् प्रदीयते धान्यमतः शांतिं प्रयच्छ मे ॥ सास्वतसोमप्राप्तिकामो वा ॥७॥ शार्करदाने ॥ शालीयपल शतद्वयेन शर्कराहारं कृत्वा वस्त्रादिना छाद्य कुसुमाधवी गौरी नन्दा भद्रा जया शिवा उमा रति सरस्वती शैलसुता एताः प्रत्येकं पाद्यादिना संपूज्य प्रणामः ततः उमा गौरी रतिर्यालक्ष्मी स्वधा स्वाहा सरस्वती सत्यानामा मातस्तथा गंगा सुवर्णी चाग्निकातथा ॥ इत्युच्चार्य देवी गौरी शर्कराहारं च संपूज्य आज्ञाल तांत्र पूजयेत् ॥ ॐ अद्य सौभाग्यवैधव्यपुत्रपौत्रादिसंततिमलधनधान्यसमृद्धितदुत्तर गौरीलोकमहीतलतदुत्तरकल्पान्ताधिकरणाक सम्पृद्धिपाधिपत्यकामनया अमुं पलद्वयशतमितं शर्कराहारं वस्त्राच्छादितं सोमदैवतं यथानामगोत्रायेत्यादि ॥ अमृतस्य कुलोत्पन्नई सुधादाति शर्करासूर्यप्रीतिकरा नित्यमतः शांतिं प्रयच्छ मे ॥ मनो भव धनुर्मध्यादुद्भूता शर्करा इति तस्मादस्याः प्रदानं वः मम शं तु मनोरथाः ॥ पलसवत्त तेजसपात्राणि सपद्मदैवतानि यथानामगोत्रायेत्यादि ॥ सत्यवत्पात्र महं शंपूर्ववत् ॥१०॥ इति दशदानविधिः ॥

ॐ अद्य वर्षकोटिमानपात्रवलावता प्राप्तिकामे ए
वर्षसहस्रावच्छिन्नेन्द्रलोकावस्थानपूर्वक
कामसमृद्धिमद्यालियसोमलोकोपभोगसम्प्र

दक्षिणा च ॥ ६ ॥ नरसिंहद्वादशीयज्ञतदाने ॥ ॐ
आदि पूर्ववत् ॥ ॐ अद्य निर्मलस्वर्गप्राप्तिकाम
प्रायश्चित्तदानं च ॥

८२२२

गाएदेव्याः कुलसर्वस्व
नाम्नः स्तोत्रम्
पत्रा १०

नं. २२

प्रबद्धवरसाधकम ४ देवदेवं महादेवं २

ता. स. श्रीगणेशाय नमः ॥ श्रीदेव्यै नमः ॥ ॥ ॐ अस्य श्रीतारादेव्या भक्तिकुलसर्वस्वनाम्नस्तो
१ त्रस्याक्षोभ्य ऋषिर्बृहतीछन्दः श्रीतारा श्रीमदेकजटा श्रीनीलसरस्वति देवता हूं बीजं फ
ट् शक्तिः सर्वकामार्थसिद्ध्यर्थे जपे विनियोगः ॥ कैलाशशिखरासीनं देवदेवं महेश्वरं ॥ भ
वानी रहसि प्रीत्या पर्यपृच्छन्महेश्वरं ॥ श्रीदेव्युवाच ॥ कथमीशान सर्वज्ञ लभन्ते सिद्धिमु
त्तमम् ॥ साधकाः सर्वदा येन तन्मे कथय सत्प्रभो ॥ श्रीशंकर उवाच ॥ विना पूजां विना
ध्यानं विना जाप्यं विना बलिं ॥ लभन्ते येन कल्याणि तन्मे निगदतः शृणु ॥ नाम्नां सहस्रं
ताराया: कथयिष्यामि यत्नतः ॥ शृणु देवि सदा भक्त्या भक्तानां परमं हितम् ॥ विना पु
जोपहारेण विना जाप्येन यत्फलं ॥ तत्फलं सकलं देवि कथयिष्यामि तच्छृणु ॥ ॐ ता
ती २ रा रात्रिर्महारात्रिः कालरात्रिः कपालिका ॥ कालिका कामदा माया महामाया महोत्स
वा ॥ महादानरता यज्ञा यज्ञोत्सवविभूषिता ॥ चन्द्रवक्त्रा चकोराक्षी चारुनेत्रा सुलोच

श्री:
१

च

ना॥त्रिनेत्राकिल्पपद्माक्षीकुरंगाक्षीमनोहरा॥ब्राह्मीनारायणीज्योत्स्नाचारुकेशीसुलो
चना॥वाराहीवारुणीविद्यामहाविद्यामहेश्वरी॥पिंगाकुंचितकेशा च महायज्ञस्वरू
पिणी॥गौरीन्चंपकवर्णाङ्गीकुलपूजिता॥सर्वानन्दस्वरूपा च सर्वसंकटतारि
णी॥नित्यानित्यमयीनन्दाभद्रानीलसरस्वती॥गायत्रीसुचरित्राचकौलव्रतपरा
यणा॥हिरण्यगर्भाभूगर्भाविश्वगर्भायशस्विनी॥हिमवत्तनयादिव्यादिव्यांवरवि
भूषणा॥जगन्माताजगद्धात्रीजगतामुपकारिणी॥ऐन्द्रीसौम्यातथायाम्यावाय
वीवारुणीतथा॥आग्नेयीनैरृतीचैवईशानीचंडिकांबिका॥सुमेरुतनयावंद्या
सर्वेषामुपकारिणी॥लल्लजिह्वासरोजाक्षीमुंडस्रजविभूषणा॥सर्वानन्द
मयीसर्वासर्वानन्दस्वरूपिणी॥ध्वनिर्मेध्वानतथालक्ष्मीश्रद्धापन्नगशायिनी
॥रुक्मिणीजानकीदुर्गासत्यासत्यवतीरतिः॥कामाख्यामोक्षदानन्तानारसिं

हीसत्त्वनी॥महादेवरता चंडी चंडदोर्दंडखंडिनी॥दीर्घकेशा सुकेशा च पिंगकेशा म
हत्कचा॥भवानी भवपत्नी च भवभीतिहरा शुचिः॥पौरंदरी तथा विष्णोर्जाया माहेश्व
री परा॥सर्वेशा जननी नित्या चार्वंगी दैत्यनाशिनी॥घोररूपा महेशानी कामिनी व
रवर्णिनी॥महाविद्या महामाया महामेधा महोत्सवा॥विरूपा विश्वरूपा च मृडानी
मृडवल्लभा॥कोटिचंद्रप्रतीकाशा शतसूर्यसमप्रभा॥जह्नुकन्या मनोज्ञा च पार्वती
हरवल्लभा॥कामरूपा महेशानी नित्योत्साहा मनस्विनी॥वैकुंठनाथपत्नी च
तथा शंकरवल्लभा॥काश्यपी कमला कृष्णा कंजपत्रायतेक्षणा॥माहेश्वरी
वृषारूढा पूर्णचंद्रनिभानना॥मान्या मान्यवती धन्या कन्या हिमगिरेः सुता
॥अपर्णा पद्मपत्राक्षी नागयज्ञोपवीतिनी॥महाशंखधरा कांता कमनीया
नगात्मजा॥ब्रह्माणी वैष्णवी शंभोर्जाया गंगा जलेश्वरी॥भागीरथी मनो

तुष्टि नित्यानन्दमयी सदा॥ हरप्रिया गिरिसुता हरपत्नी तपस्विनी॥ महाव्याधिहरा
देवी अम्भासुरनिसूदिनी॥ महाप्रलयप्रदा भीमा मधुकैटभनाशिनी॥ शंखिनी च
क्रिणी धात्री हस्ते पुस्तकधारिणी॥ चामुंडा चपला तुंगा मधुदैत्यनिकृंतिनी॥
श्रान्तिर्निद्रा महानिद्रा गलनिद्रा च रेणुका॥ कौमारी कुलजा कुंती कौलव्रतप
रायणा॥ नवदुर्गा सदाचारा द्रौपदी द्रुपदात्मजा॥ साहिंसगौश्च कालीनानिशुंभ
प्राणनाशिनी॥ पद्मिनी वसुधा पृथ्वी रोहिणी विंध्यवासिनी॥ शिवा शक्तिर्महा १००
शान्तिः शांकरी शक्तिवल्लभा॥ दैत्यप्राणहरा दात्री दया दामोदरप्रिया॥ क्षान्तिः
क्षेमंकरी बुद्धिर्बौद्धाचारपरायणा॥ श्रीविद्या भैरवी भव्या भारती भयनाशिनी॥ ता
मर्दिनी मसीनरूपिणी तीक्ष्णा तीक्ष्णा दैत्यविनाशिनी॥ दानदाग्नी दानपरा काली दैत्यवि
नाशिनी॥ पद्मा पद्मावती कृष्णा प्रसन्ना शतधोर्वशी॥ वज्रिणी वज्रहस्ता च

हृषा

तुगीदानपंचकाली दुर्गा

ना· स·
२

तथानारायणीशिवा॥खड्गिनीखड्गहस्ताचकर्त्रीखर्परधारिणी॥देवाङ्गनादेवमा
न्यादेवकन्यापुलोमजा॥सुखिनीसुखदात्रीचसर्वसौख्यविवर्द्धिनी॥शीला
शीलवतीसूक्ष्मासूक्ष्माकारवरप्रदा॥वैराग्यवरदावाणीज्ञानिनीज्ञानदाम
ला॥उग्रकालीमहाकालीभद्रकालीचदक्षिणा॥भृगुवंशसमुद्भूताभार्गवीभृ
गुवल्लभा॥शूलिनीशूलहस्ताचमयूरवरवाहना॥महामांसरतारक्तरक्तख
र्परधारिणी॥रक्ताम्बरधरारामारमणीसुरनायिका॥मोक्षदाशिवदाश्या
मामद्विभ्रममंत्रणा॥परमानन्दिनीज्येष्ठायोगिनीगणसेविता॥अंशासत्य
वतीसत्यासत्यभामानगात्मजा॥रौद्रीरौद्रस्वनारूद्रारौद्रदैत्यविनाशिनी
॥कुमारीकौशिकीविद्याकालदैत्यविनाशिनी॥शंभुपत्नीशंभुरताशंभुजा
यामहोदरी॥शिवपत्नीशिवरता॥शिवजायाम्बिकातथा॥हरपत्नीहररता

२१

गम्य

३००

श्री:
२

हरजायाच शूलिनी ॥ मदनोन्तककान्ताच मदनान्तकवल्लभा ॥ गिरिजा गिरि-
कन्याच गिरीशस्यचवल्लभा ॥ भूताभव्याभवस्थापाविनी परिपालिनी ॥ अंब-
का[illegible]रूपा च दूरात्वेरूपवर्जिनी ॥ अद्भुता [illegible] चुजप्राणापारायणवासवेश्व-
री ॥ अपांनिधिसमुद्भूता धारिणी च प्रतिष्ठिता ॥ उद्भवाक्षोभिनी क्षेमा श्रीग-
र्भा परमेश्वरी ॥ करालुपश्चदेला च कारिणी कंजलोचना ॥ शरण्या कमला-
प्रीता विमलानन्दवर्द्धिनी ॥ कपर्द्दिनी कल्पलतासमनानन्दवर्द्धिनी ॥ उदीर्णा
भूषणा भव्या सुरसेना सुरेश्वरी ॥ श्रीमती शिशिरानन्दा शिशिराचलकन्यका
॥ सुरमान्या सुरश्रेष्ठा ज्येष्ठा प्राणेश्वरी स्थिता ॥ नमो ह्रीं ध्यानसंहृ श्रीप्रयत्ना
त्मा[illegible]पतिव्रता ॥ प्रद्योतिनी रथारूढा सर्वलोकप्रकाशिनी ॥ मेधा विनीम-
हावीर्या हंसी संसारतारिणी ॥ प्रणतःप्राणिनामार्त्तिहारिणी दैत्यना

ॐ

६

भल्लो
भा

ना॰ स॰ त्रिनी॥ डाकिनी शाकिनी शीला वरखट्वाङ्गधारिणी॥ कौमुदी कुमुदाकुंदा
४ कौलिका कुलजात्मजा॥ गर्विता गुणसंपन्ना नगजा खगवाहिनी॥ च
न्द्रानना महेश्वाच चारुमूर्द्धजशोभिता॥ मनोज्ञा माधवी मान्या मानिनी
यामहङ्करा॥ श्रेष्ठा ज्येष्ठा मघा पुष्या धनिष्ठा पूर्वफाल्गुनी॥ रक्तवी
जारिहन्त्री च रक्तबीजविनाशिनी॥ चंडमुंडविहन्त्री च चंडमुंडविनाशि
नी॥ कर्त्रिहन्त्री तिककर्त्री च विमलामलवाहिनी॥ निर्मला भास्करी भीमा
महिषासुरघातिनी॥ कालिन्दी यमुना वृद्धा युवती बालिका तथा॥ कौ टीका:
शल्या केसरी माद्री हृस्वनी चापहृस्वनी॥ पुराणी गहनी पूर्णा पूर्णाहू
पायशास्विनी॥ संपूर्णचन्द्रवदना बालचन्द्रसमप्रभा॥ रेवती रमणी चित्रा

श्री:
४

गाम्र८

चित्रस्वर्नविभूषणा ॥ वीरणावीरणावतीविद्यायशोदान्चयशस्विनी ॥ नवपुष्पास
मुद्भूतानवपुष्पोत्सवोत्सवा ॥ नवपुष्पास्रजामालामाल्यभूषणभूषिता ॥ न
वपुष्पात्मिकापुष्पापुष्पास्रजविभूषणा ॥ नवपुष्पगुणोपेतानवपुष्पोप
शोभिता ॥ नवपुष्पप्रियाप्रीताप्रेतमण्डलमध्यगा ॥ कलौशास्त्रप्रदीपा
चकुलमार्गप्रवर्द्धिनी ॥ स्मशानभैरवीकालभैरवीभैरवप्रिया ॥ आनन्द
भैरवीध्यानभैरवीपरभैरवी ॥ मायाभैरवीचसौम्यभैरवीलोकभैरवी ॥
गीविद्याभैरविनीत्ति [illegible] भैरवीतरुणाभैरवी ॥ संमोहभैरवीडशीभैरवीत्रिरि
भैरवी ॥ सृष्टिस्थितिभैरवीचभैरवीस्थितिभैरवी ॥ पुण्डरीकाक्षगृहणी ॥
पुण्डरीकाक्षवल्लभा ॥ आनन्दसुन्दरीविरसुन्दरीवीरसुन्दरी ॥ तरुणान
न्दसुन्दरीचध्यानसुन्दरीपरसुन्दरी ॥ मायासुन्दरिसौम्य[illegible]सुन्दरीलो

भैरवीभैरवाट्या ता भैरवानन्दवर्द्धिनि

नवपुष्पसंमुप्राणा नवपुष्पसमुद्भुका ॥२

.नम

त्रिपा २

ना·स·
५

कसुन्दरी ॥ श्रीविद्यावसुन्दरीनीतिसुन्दरी गुणसुन्दरी ॥ मल्लिकाहाररसिकामल्लि
काहारशोभिता ॥ नवचंपकवर्णाभा नागकेशरशोभिता ॥ जपाकुसुमसंकाशा
जपाकुसुमशोभना ॥ प्रियाप्रियंकरी विद्वोर्द्धनवेन्दुविनाशिनी ॥ ज्ञानेश्वरी
ज्ञानदात्री ज्ञानानन्दप्रदायिनी ॥ गुणगौरवसंपन्ना गुणशीलसमन्विता
॥ रूपयौवनसंपन्ना रूपयौवनशोभिता ॥ गुणाश्रया गुणावती गुणगौरवसु
न्दरी ॥ लसन्ताराप्रतिख्याता टंकहयशोभिता ॥ वृक्षमूलस्थिता देवी वृक्ष
शाखोपरिस्थिता ॥ वृक्षमध्यास्थनिलया वृक्षमध्यनिवासिनी ॥ कुमुदिनी
कुमुदानन्दा कुमुदाकरशोभिता ॥ कौसुंभवस्त्ररुचिरा कौसुंभारुणमस्त
का ॥ स्वयंभूपुष्पसंकाशा स्वयंभूपुष्पधारिणी ॥ स्वयंभूपुष्परसिकाम

प्र

टं·क·४

श्री:
कुमुद्वतीकमुतीकुमुदाकुमुदाकरा १
५

पर्णा पर्णी

सुदा

ग्ना ध्यानवती ॥ भुक्तिप्रिया भक्तरता भक्तमज्ञाननत्परा ॥ पूर्णा वर्णात्मकप
र्णाचनिष्यर्णा पापनाशिनी ॥ मदिरामोदसंपन्ना मदिरामोदधारिणी ॥
सर्वाश्रया सर्वगुणानन्दकन्दनधारिणी ॥ नारीभूषणसमप्राणा नारीभूष
समुत्सुका ॥ नारीभूष्यात्मवा नारी नारीभूषणतामृगी ॥ चतुर्भुजा दशभु
जा अष्टादशभुजा तथा ॥ द्विभुजा षड्भुजा हारपंकजोपरिसंस्थिता ॥ को
वेरी कौरवी कौल्या कुलकुल्या कपालिनी ॥ विपरीतकदंबरीजंघारंभोरुस
मवद्वभा ॥ निशाचरी निशामूर्तिर्निशाचन्द्रसमप्रभा ॥ चान्द्री चन्द्रकला
चन्द्रा चारुचन्द्रसमप्रभा ॥ श्रोतस्वती श्रोतवती सर्वदुर्गार्तिनाशिनी ॥ सर्वा
धारा सर्वमयी सर्वानन्दप्रवर्द्धिनी ॥ सर्वचक्रेश्वरी सर्वा सर्वसर्वमयी सदा
॥ सहस्रनयना प्राणा सहस्रनयनप्रिया ॥ सहस्रशीर्षा सुम नागसंभास

गाननाम

सर्वकालौ गरश्रीगासर्वकाले इवोर्जुका

सप्रेशापस्तु चगोस्थाषट्चक्रद्

गिं

दंभसिका ॥ षष्ठीकावस्तुवक्रस्था षड्गोफलदायिनी ॥ षड्विंशत्पद्ममध्यस्था
षड्विंशद्दलमध्यगा ॥ हकारवर्णनिलया हकाराक्षरभूषिता ॥ हारिणी हारव
निता हारहीरकभूषिता ॥ ह्रींकारबीजसाहिता ह्रींकाररूपशोभिता ॥ कंदर्पस्य
कलाकुल्या कौलिनी कुलतर्पिता ॥ केतकीकुसुमप्राणा केतकीदलभूषिता
॥ केतकीकुसुमासक्ता केतकीपरिभूषिता ॥ कर्पूरपूर्णवदना कलानाथस
मप्रभा ॥ कालकेलिप्रियाकीर्णकदंबकुसुमोत्सुका ॥ कादंबिनी करिगतिकुं
जेरश्वरगामिनी ॥ खर्वा च खंजनप्रख्यालोचना खगभूषिता ॥ खद्योतद्व
डुल्लक्षा खद्योतद्वचंचला ॥ गया गदाग्रजप्रीता गीतवाद्यप्रियागतिः ॥ गरो
स्वरी गरोज्या च गणाद्ज्या गणप्रदा ॥ गुणा अगुणा संपत्तिर्गुणदात्रीच

दीर्घनेत्रादीर्घकचादीर्घनासाग्रचदीर्घका॥ दारिद्र्यदुःखशमनी दुष्टासुरनिसूदिनी॥ दंभि
कादंभदादांता दनुजेन्द्रविनाशिनी॥ धनधान्यप्रदा धन्या धनेश्वर धनप्रदा॥ धर
मिणी धर्मिका धर्मा धर्म धर्मप्रवर्द्धिनी॥ धनेश्वरी धर्मदात्री धर्मानन्दप्रवर्द्धिनी
॥ धनाध्यक्ष्या धनश्रीता धनाख्या धनजोषिता॥ धीरा धैर्यवती धन्या धवलां
भोजसन्निभा॥ धारिणी धारिणा धात्री धूरिणा धवलास्पदा॥ धर्मिका ध
र्मसहिता धर्मनिन्दकवर्जिता॥ नदीनानीरजानन्दा निम्ननाभिनगेश्वरी॥ नं
दनाभोजनयनानार्द्रीनां भोजसुन्दरी॥ नागरी नागराज्येष्ठा नागराजसुतान
जा॥ नागराजगतिर्नागराजसान्त्वविभूषिता॥ नागेश्वरी नागरूढा नागराज
कुलेश्वरी॥ नदीनेन्दुकलानानन्दीनन्दिकेश्वरवल्लभा॥ नीरजानीरजाक्षी
वनीरजदृन्दुलोचना॥ नीरप्रसूनानीराभानीरनिर्मलदेहिनी॥ नागयज्ञो

पर्वताख्या नागयज्ञोपवीतिका ॥ नागकेसरसंतुष्टा नागकेसरमालिनी ॥ नवीन
केतकीकुन्दमकरन्दस्रजभूषिता ॥ नायका नायकप्रीता नायकप्रीतितोषिता ॥ ना
यकप्रेमसहिता नायकप्रेमतोषिता ॥ नायकानन्दनिलया नायकानन्दकारिणी
॥ नर्मकर्मरता नित्या नर्मकर्मपरायणा ॥ नर्मकर्मप्रिया नार्मिनर्मधर्मपरायणा
॥ नर्मप्रीता नर्मरता नर्मधर्मैकपालिका ॥ नर्मकर्मैकसहिता नर्मकर्मैकपालिका
॥ नरनारीगुणप्रीता नरनारीवरप्रदा ॥ नारायणप्रिया नित्या निष्कवर्णा नका
रहा ॥ पुष्टप्रिया पुष्टरता पोष्टीपापपरायणा ॥ पोष्टीप्रिया सुपुष्टोज्या पुष्ट
दामविभूषिता ॥ पुण्यदा पूर्णिमा पुण्या पुण्यकोटिफलप्रदा ॥ पुराणागमविद्या
च पुराणागमतोषिता ॥ पुराणागमगोप्या च पुराणागमतोषिता ॥ पुराणागो
चरा पूर्वा पूर्वा प्रौढविनाशिनी ॥ प्रह्लादहृदयाह्लादगेहिनी पुण्यचारिणी ॥ फ

ल्गुनी फल्गुनप्रीता फल्गुनप्रेमधारिणी ॥ फल्गुफलप्रदा चैव फणिराजविभूषि
ता ॥ फणाकारा फणिप्रीता फणिराजविभूषिता ॥ फणिसत्र छत्रसर्वाङ्गभूषणा फ
णिवाहिनी ॥ फणिप्रीता फणिरता फणिकंकणधारिणी ॥ फलधात्री फलो
द्रात्ता फलाभरणभूषिता ॥ फकारकूटसर्वाङ्गी फल्गुनानन्दवर्द्धिनी ॥ वासरे
वरत्ना विद्या विज्ञा विज्ञानकारिणी ॥ वीणावती वलाकीर्णा बालपीयूषलोचना ॥ वा
लावसुमती विद्या विद्याहारविभूषिता ॥ विद्यावती वेद्यवती ब्रीडा वेवस्वती रती ॥ वा
रुणी विलासकारिणी वराङ्गनवरानना ॥ विष्णोर्वक्षस्थलस्था च वाग्वती विन्ध्यवासि
नी ॥ वानीरतरुसंस्था च वानीरकुसुमोत्सुका ॥ भीतिदा भयदा भानोरसुजालस
मप्रभा ॥ भार्गवेज्या भगोः पूज्या भारद्वाजादिवंदिता ॥ भीतिहा भयसंपन्ना भीमा
कारा भ्रमसुन्दरी ॥ मायाधरी मानरता मानसन्मानतत्परा ॥ माधवानन्ददा मा
ध्वी मदिरा मदिरेक्षणा ॥ महोत्साहगणोपेता महती महदद्भुता ॥ मदिरामोद

षल्लिनामहिताम ज्ञनेत्रना॥ यज्ञोश्चरित्रेय ज्ञोविद्याय ज्ञोद्यानन्दवर्द्धिनी॥ यज्ञाः कर्पूर-
धवलाय ज्ञोदसाधिभूषिता॥ यमराजस्वसा योगमार्गानन्दविवर्द्धिनी॥ याद्वानन्द-
कारिणी याद्वानन्दवर्द्धिनी॥ यज्ञप्रीता यज्ञमयी यज्ञकर्मविभूषिता॥ रामप्रिया रामभरनारी
मनोघरानन्दरा॥ राज्ञी राजकुलेज्या च राजराजेश्वरी रमा॥ रामरणीरमणीरम्या रामान-
न्दप्रदायिनी॥ रजनीकरपूर्णास्या रक्तोत्पलविभूषिता॥ लाङ्गलिप्रेमसंयुक्ता ला-
ङ्गलीप्राणयप्रिया॥ लाक्षारुणा च ललना लालीलावती लया॥ लङ्केश्वरगुणा ण
प्रीता लकेशावरदायिनी॥ लवङ्गकुसुमप्रीता लवङ्गकुसुमस्रजा॥ बालाविवस्वद-
हिरणी विवस्वत्प्रेमधारिणी॥ शरण्या शरला शल्या शरण्या क्षिनवद्गुणा॥ ष-
ट्कोणचक्रमध्यस्था संपदाहीं विक्षोभिता॥ क्षेमा क्षमा च तथा क्षा च ईश्वरी स्वर-
वहन्नमा॥ उग्रा चैव तथा चोग्या ऋका ऋकार स्वरोद्भवा॥ लृकारवर्णकूटस्था लृका-
रस्वरभूषिता॥ एषा चैषा तथा चैषा ओंकाराक्षरधारिणी॥ अंसा अकारवनिता

२४

श्री
५

सर्वांगमस्तु गोपिता ॥ ईश्वर उवाच ॥ य इदं पठति स्तोत्रं प्रत्यहं भक्तितत्परः ॥ दिवारात्रौ
च संध्यायां समये च महानिशि ॥ स्तवमात्रस्य पाठेन राजा किंकरतामियात् ॥ सर्वागमेषु पू
ज्यास्या सर्वतंत्रेस्वयं हरः ॥ शिवस्थाने च संध्यायां शून्यागारे चतुष्पथे ॥ यः पठेद्रात्र
याह्नापि स योगी नात्र संशयः ॥ यानि नामानि संत्यस्मिन् प्रसंगान् क्रूरवैरिणः ॥ ज्ञात्वा नि
ता निकृत्याशिनान्यानि तु कदाचन ॥ हरेर्नाम न गृह्णीयान्न स्पृशेत्तुलसीदलं ॥ ना
न्यचिन्तापुष्पकं तेषां नान्यनिन्दां कदाचन ॥ सिन्दूरं करवीरार्द्धैः पुष्पैर्लोहितकैः शि
वां ॥ याचयेद्भक्तिभावेन तस्यासाध्यं न किंचन ॥ वातस्तंभं जलस्तंभं गतिस्तंभं विवस्वतः
॥ वह्नेः शैत्यं करोत्येव स्तवस्यास्य प्रकीर्तनात् ॥ स्त्रियमाकर्षयेद् दुर्गामारीं मजयेत्तु हठा
त् ॥ मोहयेद्राजदारांश्च देवानपि वशं नयेत् ॥ यः पठेद्रात्रयाह्नापि स्मरेच्चिन्तनेन सर्वदा
॥ सदीर्घायुः कवीवाग्मी वारांगनास्य वशंकरी ॥ सर्वतीर्थाभिषेकेन गयाश्राद्धेन यत्फ
लं ॥ तत्फलं सकलं देवी यः पठेदेकान्वितः ॥ येषां मारा धने श्रद्धा ये च स्ता ॥ विनाशघ

क

स्त

ताः॥ तेषां हितार्थं सर्वत्र गतिर्देवी परालये॥ अनुयुक्तलतामध्ये स्थित्वायं डेन नाड्यत॥ जप
प्यालकां वा च भक्त्या च गुहेदेनादिकापदं॥ अष्टम्यां च चतुर्दश्यां नवम्यां शनिवासरे॥ संक्रा
न्तौ मङ्गले रात्रावमावास्यां चयो चयेत्॥ वर्षं व्याप्य तु देवेशि तस्याधीनास्तु सिद्धयः॥ मृतपुत्रा
च या नारी मृतगर्भा च याङ्गना॥ मृतापत्या च या नारी दौर्भाग्यापत्तिपीडिता॥ वंध्या वा काक
वन्ध्या वा मृतपुत्रा च या कन्या॥ धनधान्यविहीना च रोगशोककुला च या॥ ताभिरेतन्म
हायंत्रं भूर्जपत्रे लिखापयेत्॥ सव्ये भुजे तु वध्नीया सर्वसौख्यवती भवेत्॥ स्वप्नमानापिश्रा
यो दुःखेन परिपीडितः॥ सभार्या यस्य नेष्टारे विवादे रिपुसंकटे॥ चतुरंगेन बाधुद्धे सर्वत्रापद
दिपीडिते॥ स्मरणादस्य कल्याणि संक्षयं याति चापदः॥ पूजनीया प्रयत्नेन शून्यागारे शि
वालये॥ बिल्ववृक्षतले देवी सर्वदा कुलमण्डले॥ शर्करासवसंयुक्तैर्दुग्धैर्भक्ष्यैः सतण्डुलैः
॥ अपूपिष्टसंयुक्तैर्नैवेद्यैः स्वयथोचितैः॥ निवेद्य द्विजं च यद्वुथ्यं भोक्तव्यं च विधानतः॥ न
गं चेद्भुज्यते मोहाक्रोध्मिन्द्धं निदेवताः॥ अनेनैव विधानेन योऽर्चयेत्परमेश्वरीम्॥ सम्भ

सिद्ध्यते देवि साक्षाद्दीशो न संशयः॥ महाशंखेन कल्याणि सर्वकार्यं जपादिकं॥ कुलसर्वस्वकस्ये
यप्रभावो वर्णितो मया॥ न शक्यते मया वक्तुं वर्षकोटिशतैरपि॥ किंचिन्मयात्र चापल्यात्कथि
तं परमेश्वरि॥ जन्मान्तरसहस्रेण वर्णितुं न च शक्यते॥ कुलीनाय प्रदातव्यं ताराभक्तिपरा
य च॥ अन्यभक्ताय नो देयं वैष्णवाय विशेषतः॥ कुलीनाय सुसिद्धाय भक्तिश्रद्धापराय च॥
महात्मने सदा देवि परीक्षितगुणाय च॥ नाभक्ताय प्रदातव्यं पथान्तरपराय च॥ न देयं देवदे
वेशि गोप्यं सर्वागमेषु सदा॥ पठनीयं सदा देवि सर्वावस्थासु सर्वदा॥ यः स्तोत्रं कुलनामकं प्रतिदि
नं भक्त्या पठेन्मानवः सम्यग्द्विजा च ये धनेश्वरसमो विद्या भवेद्वाक्पतिः॥ सौन्दर्येणाच मू
र्तिमान्मनसिजः कीर्त्या च शीतद्युतिः आज्ञया शंकरस्व शौर्यविभवे लक्ष्मीपतिर्नान्यथा॥
॥ ॥इति श्रीहरगौरीसंवादे तारादेव्याः कुलसर्वस्वनामस्तोत्रं समाप्तम्॥ ॥शुभमस्तु॥

सम्वत १९३५ मार्ग शुदि ३ रोज ७
यज्ञनाथशर्मणा लिखितम्॥